# संस्कृत सोपानम्

भाग 1



# संस्कृत सोपानम्

## भाग 1




*लेखक*

**डॉ॰ सुरेन्द्र गम्भीर**

एम॰ ए॰ (संस्कृत, भाषा-विज्ञान)

साहित्यशास्त्री, पी-एच॰डी॰

भू॰पू॰ अध्यक्षः, संस्कृत विभागः

मॉडर्न स्कूल, नई दिल्ली



**पीताम्बर पब्लिशिंग कम्पनी प्रा॰ लि॰**

888, ईस्ट पार्क रोड, करौल बाग़, नई दिल्ली-110 005 (भारत)

**शाखाएँ**

**बैंगलोर** : आवास न॰ 6/2, III मेन रोड, एस॰के॰ गार्डन, बेन्सन टाउन पोस्ट, बैंगलोर-560046 दूरभाष : 080-23534673

**चेन्नई** : 10, हंटर्स रोड, प्रथम तल, चुलाई, चेन्नई-600014 दूरभाष : 044-25322333

**हैदराबाद** : ए जी-18, शांति बाग अपार्टमैंट्स, बेगमपेट, हैदराबाद-500016 दूरभाष : 040-23737423

**जयपुर** : 113, इंद्रा कालोनी, बनी पार्क, जयपुर-302016 दूरभाष : 0141-2203440

*प्रकाशक* :
**पीताम्बर पब्लिशिंग कम्पनी प्रा० लि०**
888, ईस्ट पार्क रोड, करौल बाग़, नई दिल्ली-110 005 (भारत)
दूरभाष : 23670067, 23522997, 23625528
फैक्स : 91-11-23676058, 91-11-25765754
ई-मेल : pitambar@bol.net.in

**संस्करण** : प्रथम, 1972
पुनर्मुद्रण, 1973, 1974, 1975
द्वितीय, 1976
पुनर्मुद्रण, 1976, 1977, 1978, 1979, 1980, 1981, 1982
तृतीय, 1983
पुनर्मुद्रण, 1984, 1985, 1986, 1987, 1988, 1989, 1990, 1991
चतुर्थ, 1992
पुनर्मुद्रण, 1993, 1994, 1995
पंचम, 1996
पुनर्मुद्रण, 1997, 1998, 1999, 2000
संशोधित एवं परिमार्जित संस्करण, 2001
पुनर्मुद्रण : 2002, 2003

**प्रिय ग्राहक**
आपको जाली/नकली पुस्तकों से बचाने के लिए हमने इस पुस्तक में यह होलोग्राम चिपकाया हुआ है । यदि यह होलोग्राम यहाँ नहीं है तो कृपया पुस्तक को न खरीदें क्योंकि यह जाली/नकली हो सकती है । अगर आपको बिना होलोग्राम कोई पुस्तक प्राप्त हो तो कृपया हमें सूचित करें ।
**प्रकाशक**

**सर्वाधिकार** : © सुरक्षित

**कोड नं.** : 12617

**ISBN** : 81-209-0546-6

**मूल्य** 58/- रुपये

**इस पुस्तक पर आधारित अभ्यास – पुस्तिका भी प्राप्य है।**

*आवरण* : (1) महाकवि कालिदास शाकुन्तल की रचना करते हुए ।
(2) जर्मन विद्वान मैक्सम्यूलर — जिन्होंने संस्कृत के ग्रंथों का अनुवाद जर्मन भाषा में किया तथा गीता-उपदेश ।

पीयूष प्रिंटर्स पब्लिशर्स प्रा० लि०, नई दिल्ली-41 द्वारा मुद्रित ।

# किञ्चित्



प्रस्तुतमाला-विषयकम्

भाषा-मनोविज्ञान-शास्त्रिणां शोधैः भाषा-शिक्षणमपि कला-रूपेण उपस्थापितम् । अल्पादपि अल्पतरे समये अधिकस्य शिक्षणस्य स्पर्धा सर्वत्र दृष्टिपथमवतरति । कस्या अपि भाषायाः शिक्षणस्य चतस्रः विधा भवन्ति, तथाहि-श्रवणं, वदनं, पठनं लेखनञ्चेति । परं संस्कृत-सदृश्यै भाषायै पठनं तदवगमश्चैव प्राधान्येन लक्ष्यीकृतं स्याद् इत्यस्ति व्यवस्थिता मनीषा भाषा-शास्त्र-विदाम् । गौणरूपेण पठनविधायाः साधनरूपेण वदनादि-विधा अपि अनुशील्यन्ताम् । सत्यमेतत् यत् भाषा-भाषणेन छात्राणां विश्वासो वर्धते रुचिश्चापि वृद्धिं गच्छति । एतद् विचार्यैव अत्र ललितानि संस्कृत-पद्यानि, दैनन्दिन-व्यवहार-पराणि कानिचित् सरल-संस्कृत-वाक्यानि च पुस्तकारम्भे दत्तानि । अनुदिनम् एतेषाम् अनुशीलनेन छात्राणां संस्कृत-भाषां प्रति अनुरक्तिर्वर्धिष्यते इत्याशासे । भाषा-शिक्षण-विधानां प्रधान्य-गौण-व्यवस्थाया विस्मरणं न भवेत् इत्यावश्यकम् । लक्ष्ये स्पष्टे पन्था अपि स्पष्टो जायते ।

प्रत्येकं पुस्तक छात्रस्य आयुस्स्तरमावश्यकताञ्च विलोक्यैव प्रणीतम् । भाषा-ज्ञान-भित्तिः आदित एवं दृढमूला सुसंहता च भवेदिति दृशा सर्वमत्र क्रमिकं मितं नियतञ्चास्ति । प्रत्येकं शब्दः कयापि योजनयैव सन्निवेशितः । प्रस्तुत-मालायां शब्दा इत्थं प्रयुक्ताः, वाक्य-रचना एवमायोजिता व्याकरणञ्चेत्थं क्रमेण अल्पाल्पशः गुम्फितं येन बालः सारल्येनैव सर्वं शिक्षेत । क्रमिक-शिक्षणं क्रमिक-विकासाय आवश्यकम् । भाषा-शिक्षणेन साकं साहित्यस्य रुचिरा ललिताश्चांशाः सन्निवेशिताः । संस्कृत-वाङ्मय-महोदधि मंथनोत्थानि कथा-रत्नानि पद्य-रत्नानि निदर्शन-भूतानि चात्र गुम्फितानि । अन्यच्च, विज्ञान-संस्कृति-सामाजिक-ज्ञानादि-विषयान् अन्तरेण पाठा अपि चात्र सन्निविष्टा सन्ति ।



प्रत्येकं पाठस्योपरि पाठ्य-संकेतेन पाठे यदुद्दिष्टं तदवगमे सौकर्यं भविष्यति । सन्धीनां समासानां चाप्रयोगः सारल्यनिमित्तकः । पुस्तकस्यान्ते दत्तश्शब्दकोशः बालान् शब्दकोशस्यानुशीलनाय प्रवर्तयिष्यते । पाठेभ्यः व्यतिरिक्तमभ्यासेष्वपि अन्ये प्रोचकाः बुद्ध्युत्तेजकाः प्रयोगाः प्रश्नाश्च दत्ताः ।

वस्तुस्थितिरियं यत् न वयं छात्रेषु बहु आशास्महे । शिक्षाविदां तर्कानुभवानुमोदितं वचः यत् यावत छात्रेषु सम्भाव्यते तावत्येव ते कृत-प्रयत्नाः भवन्तीति शम् ।

–गम्भीरः

# विषय सूची

| क्रम | | पृष्ठ |
|---|---|---|
| 1. | वर्णमाला | 1 |
| 2. | अकारान्त-पुँल्लिगम् | 3 |
| 3. | प्रथमपुरुष-एकवचनम् | 6 |
| 4. | प्रथमपुरुष-द्विवचनम् | 8 |
| 5. | प्रथमपुरुष-बहुवचनम् | 11 |
| 6. | आकारान्त-स्त्रीलिंगम् | 14 |
| 7. | प्रथमपुरुष-स्त्रीलिंगम् | 17 |
| 8. | अकारान्त-नपुँसकलिंगम् | 19 |
| 9. | प्रथमपुरुष-नपुँसकलिंगम् | 22 |
| 10. | मध्यमपुरुष-एकवचनम् | 24 |
| 11. | मध्यमपुरुष-द्विवचनम् | 27 |
| 12. | मध्यमपुरुष-बहुवचनम् | 30 |
| 13. | उत्तमपुरुष-एकवचनम् | 33 |
| 14. | उत्तमपुरुष-द्विवचनम् | 36 |
| 15. | उत्तमपुरुष-बहुवचनम् | 38 |
| 16. | लृट्लकार: | 41 |
| 17. | कर्मकारकम् (द्वितीया विभक्ति:) | 44 |
| 18. | करणकारकम् (तृतीया विभक्ति:) | 47 |
| 19. | सम्प्रदानकारकम् (चतुर्थी विभक्ति:) | 50 |
| 20. | अपादानकारकम् (पञ्चमी विभक्ति:) | 53 |
| 21. | सम्बन्धकारकम् (षष्ठी विभक्ति:) | 56 |
| 22. | अधिकरणकारकम् (सप्तमी विभक्ति:) | 59 |
| 23. | सम्बोधनम् | 62 |
| 24. | संख्या | 65 |
| 25. | ग्राम: | 67 |
| 26. | त्रय: धूर्ता: ब्राह्मण: च | 70 |
| | व्याकरणम् | 73 |
| | शब्दकोष: | 81 |

# व्यवहार-वाक्यानि





| | | |
|---|---|---|
| 1. | नमस्ते ! | (Hello ; Good morning ; Good afternoon ; etc.) |
| 2. | तव किम् नाम अस्ति ? | (What's your name ?) |
| | मम नाम जयन्तः/वैजयन्ती अस्ति । | (My name is Jayant / Vaijayanti) |
| 3. | त्वम् संस्कृतम् पठसि ? | (Do you study Sanskrit ?) |
| | आम्, अहम् संस्कृतम् पठामि । | (Yes, I am studying Sanskrit.) |
| 4. | एतत् तव मित्रम् अस्ति ? | (Is this your friend ?) |
| | आम्, एतत् मम मित्रम् अस्ति । | (Yes, this is my friend.) |
| 5. | आगच्छतु, उपविशतु ! | (Please come, have a seat !) |
| | आगच्छामि । धन्यवादाः । | (I am coming. Thanks.) |
| 6. | किम् इदम् ? | (What is this ?) |
| | इदम् मम पुस्तकम् । | (This is my book.) |
| 7. | उत्तिष्ठ ! | (Stand up !) |
| 8. | उपविश ! | (Sit down !) |

**(These sentences are for everyday use in Sanskrit. Use them in appropriate situations. For practice, also role-play with other students.)**

| अध्यायः 1 | # वर्णमाला |
|---|---|

## स्वराः

आ आ इ ई उ ऊ ऋ ॠ ए ऐ ओ औ

## अनुस्वारः

## विसर्गः :

## व्यंजनानि

| | | | | |
|---|---|---|---|---|
| क् | ख् | ग् | घ् | ङ् |
| च् | छ् | ज् | झ् | ञ् |
| ट् | ठ् | ड् | ढ् | ण् |
| त् | थ् | द् | ध् | न् |
| प् | फ् | ब् | भ् | म् |
| य् | र् | ल् | व् | |
| श् | ष् | स् | ह् | |

## संयुक्त-व्यंजनानि

क्ष् = क् + ष्

त्र् = त् + र्

ज्ञ् = ज् + ञ्

श्र् = श् + र्

## व्यंजनम् + स्वर :

| | |
|---|---|
| क् + अ = क | क् + आ = का |
| क् + इ = कि | क् + ई = की |
| क् + उ = कु | क् + ऊ = कू |
| क् + ऋ = कृ | क् + ॠ = कॄ |
| क् + ए = के | क् + ऐ = कै |
| क् + ओ = को | क् + औ = कौ |

### अभ्यासः

**मौखिकम् (Oral)**

1. स्वर और व्यजन अलग-अलग कीजिए (Separate vowels and consonants) —
   ख्, ऊ, ज, ऋ, र्, ठ्, थ्, ए, आ, त्, ई, ऐ, य, क्ष्, औ, अ, फ्, ढ्।
2. संयुक्त व्यंजनों का उच्चारण कीजिए (Pronounce the conjunct consonants).
3. संस्कृत वर्णमाला सुनाइए (Tell the Sanskrit alphabet).

**लिखितम्**

4. व्यंजन में स्वर जोड़िए (Join the vowel to the consonant) —
   घ् + आ, र् + ई, श् + ऊ, ह + ए,
   म् + ई, ध् + ऐ, च् + ओ, म् + ऋ
5. संयुक्त व्यंजन लिखिए (Write the conjunct consonant) —
   त् + त् =
   श् + र् =
   ज् + र् =
   क् + ष् =

□□□

| अध्यायः 2 | अकारान्त पुँल्लिगम् |
| --- | --- |



नरः



बालः



नृपः



अश्वः



सिंहः



गजः



खगः



विडालः



कुक्कुरः



सूर्यः



चन्द्रः



शकटः



कलमः



मयूरः



हस्तः

## शब्दार्थाः

| | | | |
|---|---|---|---|
| नरः | = | आदमी | (man) |
| बालः (बालकः) | = | बालक | (boy) |
| नृपः | = | राजा | (king) |
| अश्वः | = | घोड़ा | (horse) |
| सिंहः | = | शेर | (lion) |
| गजः | = | हाथी | (elephant) |
| खगः | = | पक्षी | (bird) |
| विडालः | = | बिलाव | (cat—*male*) |
| कुक्कुरः | = | कुत्ता | (dog) |
| सूर्यः | = | सूरज | (sun) |

| | | | |
|---|---|---|---|
| चन्द्रः | = | चन्द्रमा | (moon) |
| शकटः | = | गाड़ी | (cart, train) |
| कलमः | = | कलम | (pen) |
| मयूरः | = | मोर | (peacock) |
| हस्तः | = | हाथ | (hand) |

## अभ्यासः

### मौखिकम्

1. पढ़िए (Read) —
   गजः, सिंहः, कलमः, मयूरः, शकटः, कुक्कुरः, नृपः, अश्वः, विडालः, बालः, सूर्यः, नरः, खगः, हस्तः।
2. शब्दों के वर्ण अलग-अलग कीजिए (Separate letters in each word) —
   *उदाहरणम्–*
   *गजः = ग् + अ + ज् + अ + : (विसर्ग)*
   कलमः, अश्वः, चन्द्रः, हस्तः।

### लिखितम्

3. अर्थ लिखिए (Give the meaning) —
   शकटः, कुक्कुरः, विडालः, मयूरः, खगः, गजः, सिंहः, नृपः, अश्वः।
4. किन्हीं चार पशुओं के नाम संस्कृत में लिखिए (Write names of any four animals in Sanskrit).
5. संस्कृत-पर्याय लिखिए (Give Sanskrit equivalents) —
   बाल (boy), सूरज (sun), मनुष्य (human being), चन्द्रमा (moon), हाथ (hand).

□□□

अध्यायः 3

# प्रथमपुरुष-एकवचनम्

**लिख् चल् पठ् खेल् शिष्यः भक्तः सः अस्ति**





बालः लिखति।
नरः लिखति।
अश्वः चलति।
शकटः चलति।
शिष्यः पठति।
भक्तः पठति।
बालः लिखति।
सः बालः लिखति।
विड़ालः खेलति।
सः विडालः खेलति।
सः गजः अस्ति।
सः सिंहः अस्ति
सः नृपः अस्ति, सः लिखति।
सः शकटः अस्ति, सः चलति।
सः भक्तः अस्ति, सः पठति।

**शब्दार्थाः**

| | | | |
|---|---|---|---|
| लिख् | = | लिखना | (to write) |
| पठ् | = | पढ़ना | (to read) |
| शिष्यः | = | शिष्य | (disciple, student) |
| सः | = | वह | (he, that) |
| चल् | = | चलना | (to walk, to move) |
| खेल् | = | खेलना | (to play) |

| | | | |
|---|---|---|---|
| भक्तः | = | भक्त | (devotee) |
| अस्ति | = | है | (is) |

## अभ्यासः

### मौखिकम्

**1.** पढ़िए और अर्थ बताइए (Read and tell the meaning) —

शिष्यः खेलति। भक्तः पठति। नृपः चलति। कुक्कुरः चलति। मूर्यः न चलति।

**2.** संस्कृत-पर्याय बताइए (Give Sanskrit equivalents) —

राजा (king), मोर (peacock), गाड़ी (train), खेलना (to play), पक्षी (bird), भक्त (devotee), वह (that), है (is).

### लिखितम्

**3.** प्रत्येक वाक्य तीन-तीन बार लिखिए (Write each sentence three times)—

भक्तः लिखति। शिष्यः हसति। सः पठति। विडालः खेलति। सिंहः चलति।

**4.** संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

| | |
|---|---|
| 1. बालक पढ़ रहा है। | 1. The boy is studying. |
| 2. शिष्य लिखता है। | 2. The student writes. |
| 3. कुत्ता चलता है। | 3. The dog walks. |
| 4. शेर खेलता है। | 4. The lion plays. |
| 5. हाथी खेल रहा है। | 5. The elephant is playing. |
| 6. वह चलता है। | 6. He walks. |
| 7. पक्षी चल रहा है। | 7. The bird is walking. |
| 8. यह बिलाव है। | 8. This is a cat. |
| 9. वह भक्त है। | 9. He is a devotee. |

### विशेषः

वर्तमान (लट्) क्रिया के दो अर्थ हैं, जैसे — **लिखति** का अर्थ है **लिखता है** या **लिख रहा है** (Present tense (लट्) forms have two meanings, e.g. **लिखति** means **writes** or **is writing**) ।

□□□

| अध्यायः 4 | प्रथमपुरुष-द्विवचनम् |
|---|---|

रक्ष् वद् हस् सैनिकः कृषकः छात्रः न तौ अपि स्तः

सैनिकौ रक्षतः।
कृषकौ अपि रक्षतः।

छात्रौ वदतः।
शिष्यौ अपि वदतः।

बालौ हसतः
नृपौ न हसतः।



तौ सैनिकौ स्तः। तौ रक्षतः।
तौ कृषकौ स्तः। तौ वदतः।
तौ छात्रौ स्तः, तौ पठतः।
तौ भक्तौ स्तः, तौ वदतः।
तौ सिंहौ स्तः, तौ चलतः।

बालः खेलति, बालौ खेलतः।
सः पठति, तौ पठतः।
सः खगः अस्ति, तौ खगौ स्तः।
सः छात्रः अस्ति, तौ छात्रौ स्तः।



**शब्दार्थाः**

| | | | |
|---|---|---|---|
| सैनिकः | = | सैनिक | (soldier) |
| रक्ष् | = | रक्षा करना | (to guard, defend) |

| | | | |
|---|---|---|---|
| कृषकः | = | किसान | (farmer) |
| छात्रः | = | विद्यार्थी | (student) |
| वद् | = | बोलना | (to speak) |
| हस् | = | हँसना | (to laugh) |
| न | = | नहीं | (not) |
| तौ | = | वे दो (पुं.) | (they two—*masc.*) |
| अपि | = | भी | (also) |
| स्तः | = | हैं (*दो के लिए*) | (are—*for two*) |

**विशेषः**

द्विवचन क्रियाओं के भी दो अर्थ होंगे। जैसे— **सैनिकौ रक्षतः** का अर्थ है— दो **सैनिक रक्षा करते हैं या दो सैनिक रक्षा कर रहे हैं** (Dual verb forms also have two meanings, for example, **सैनिकौ रक्षतः** may mean either **two soldiers guard or two soldiers are guarding).**

## अभ्यासः

### मौखिकम्

**1.** पढ़िए (Read)—

बालौ पठतः, गजौ न पठतः। शकटः चलति, सूर्यः न चलति। विडालः खेलति, कुक्कुरः न खेलति। तौ शिष्यौ लिखतः, सः नरः न लिखति। तौ सैनिकौ स्तः।

**2.** संस्कृत-पर्याय बताइए (Give Sanskrit equivalents)—

घोड़ा (horse), सैनिक (soldier), वे दो (those two), हाथ (hand), भी (also), न (not), विद्यार्थी (student), किसान (farmer)।

### लिखितम्

**3.** प्रत्येक वाक्य तीन बार लिखिए (Write each sentence three times)—

सैनिकौ पठतः। सः लिखति। छात्रौ चलतः। चन्द्रः चलति। नृपौ रक्षतः। कृषकौ चलतः।

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

1. दो कुत्ते चल रहे हैं। — 1. Two dogs are walking.
2. दो सैनिक बोल रहे हैं। — 2. Two soldiers are speaking.
3. दो किसान हँस रहे हैं। — 3. Two farmers are laughing.
4. दो विद्यार्थी पढ़ रहे हैं। — 4. Two students are studying.
5. वे दो लिख रहे हैं। — 5. Two of them are writing.
6. दो मनुष्य रक्षा कर रहे हैं। — 6. Two persons are guarding.
7. वह लिखता है। — 7. He writes.
8. वे दो लिखते हैं। — 8. Two of them write.
9. वह हँसता है। — 9. He laughs.
10. वे दो मोर हैं। — 10. Those two are peacocks.

□□□

| अध्यायः 5 | # प्रथमपुरुष-बहुवचनम् |
|---|---|

नम् क्रन्द् गर्ज् कूज् पिकः तु ते सन्ति



शिष्याः नमन्ति।
भक्ताः नमन्ति।

बालाः क्रन्दन्ति।
कुक्कुराः अपि क्रन्दन्ति।

सिंहाः गर्जन्ति।
पिकाः न गर्जन्ति।
पिकाः तु कूजन्ति।



ते भक्ताः नमन्ति।
ते बालाः क्रन्दन्ति।

ते सिंहाः गर्जन्ति।
ते पिकाः कूजन्ति।

ते छात्राः सन्ति, ते नमन्ति।
ते विडालाः सन्ति, ते क्रन्दन्ति।

| | | |
|---|---|---|
| भक्तः नमति। | भक्तौ नमतः | भक्ताः नमन्ति |
| बालः क्रन्दति | बालौ क्रन्दतः | बालाः क्रन्दन्ति |
| सः सिंहः अस्ति | तौ सिंहौ स्तः | ते सिंहाः सन्ति |
| सः पिकः अस्ति | तौ पिकौ स्तः | ते पिकाः सन्ति |

## शब्दार्थाः

| | | | |
|---|---|---|---|
| नम् | = | नमस्कार करना | (to bow, to salute) |
| क्रन्द् | = | रोना | (to cry) |
| गर्ज् | = | गरजना | (to roar) |
| कूज् | = | कूजना | (to chirp) |
| पिकः | = | कोयल | (cuckoo) |
| तु | = | तो | (on the other hand, but) |
| ते | = | वे सब | (they) |
| सन्ति | = | हैं | (are) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meaning)—

नराः क्रदन्ति, नृपाः न क्रदन्ति। बालाः वदन्ति, अश्वाः न वदन्ति। सैनिकाः रक्षन्ति, मयूराः न रक्षन्ति। सः खेलति, ते अपि खेलन्ति। बालः हसति, पिकः अपि हसति।

2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents)—

कोयल (cuckoo), गरजना (to roar), वे सब (they), नमस्कार करना (to salute, bow), रोना (to cry), कूजना (to chirp)।

### लिखितम्

3. हिन्दी में अनुवाद कीजिए (Translate into English)—

ते नमन्ति। शिष्यौ नमतः। छात्रौ लिखन्ति। बालाः अपि पठन्ति। ते कुक्कुराः चलन्ति। ते नराः सन्ति।

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

1. बालक बोल रहे हैं।
2. राजा नमस्कार कर रहे हैं।
3. किसान पढ़ते हैं।
4. बिलाव रोते हैं।
5. शेर गरजते हैं।
6. पक्षी कूजते हैं।
7. श्याम हँसता है।
8. सुनील खेल रहा है।
9. वे दोनों रक्षा कर रहे हैं।
10. वे शेर हैं।

1. Boys are speaking.
2. Kings are saluting.
3. Farmers study.
4. Cats cry.
5. Lions roar.
6. Birds chirp.
7. Shyam laughs.
8. Sunil is playing.
9. Both of them are guarding.
10. Those are lions.

अध्यायः 6

# आकारान्त-स्त्रीलिंगम्



बालिका



छात्रा



ललना



रमा



शारदा



अध्यापिका




गीता



खट्वा



वाटिका




पाठशाला



गुहा



माला



वसुधा



लता



ग्रीवा

## शब्दार्थाः

| | | |
|---|---|---|
| बाला (बालिका) | = लड़की | (girl) |
| छात्रा | = विद्यार्थी लड़की | (girl-student) |
| ललना | = स्त्री | (woman) |
| रमा | = लक्ष्मी | (Lakshmi—Goddess of wealth) |
| शारदा | = सरस्वती | (Sarasvati—Goddess of learning) |
| अध्यापिका | = अध्यापिका | (lady teacher) |
| गीता | = गीता | (the Gita) |
| खट्वा | = खाट | (cot, bed) |
| वाटिका | = बगीचा | (garden, lawn) |

| | | |
|---|---|---|
| पाठशाला | = स्कूल | (school) |
| गुहा | = गुफ़ा | (cave) |
| वसुधा | = पृथ्वी | (earth) |
| लता | = बेल | (creeper) |
| ग्रीवा | = गरदन | (neck) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meaning)—
वसुधा, गुहा, वाटिका, पाठशाला, ललना, बाला, खट्वा, लता।

### लिखितम्

2. अर्थ लिखिए (Write the meaning) —
ग्रीवा, शारदा, माला, गीता, अध्यापिका।

3. स्त्रीलिंग और पुँल्लिंग शब्द अलग-अलग कीजिए (Separate feminine words from masculine words)—
नरः, गुहा, चन्द्रः, कुक्कुरः, ललना, रमा, रामः, पाठशाला, हस्तः, नृपः, माला।

4. स्त्रीलिंग रूप बताइए (Give feminine forms)—
बालः, छात्रः, अध्यापकः।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. लड़की वहाँ है। | 1. The girl is there. |
| 2. वे सब नमस्कार करते हैं। | 2. All of them salute. |
| 3. महिला चलती है। | 3. The woman walks. |
| 4. कोयलें कूक रही हैं। | 4. Cuckoos are cuckooing. |
| 5. पक्षी नहीं बोलते। | 5. Birds do not talk. |
| 6. सैनिक चलते हैं। | 6. Soldiers walk. |

□□□

| अध्यायः 7 | प्रथमपुरुष-स्त्रीलिंगम् |
|---|---|

गम् (गच्छ्) कन्या सा ते ताः च



बालिका खेलति।

बालिके खेलतः।

बालिकाः खेलन्ति।

कन्या वदति।

कन्ये वदतः।

कन्याः वदन्ति।

उमा हसति।

कन्ये चलतः

ललनाः वदन्ति।



सा गच्छति।

ते अपि गच्छतः।

ताः तु न गच्छन्ति।

सा शारदा अस्ति।

ते छात्रे स्तः।

ताः ललनाः सन्ति।

उमा छात्रा अस्ति।

उमा प्रभा च छात्रे स्तः।

उमा प्रमा प्रभा च छात्राः सन्ति।

सा अध्यापिका अस्ति। सा वदति।

ताः बालिकाः सन्ति, ताः अपि वदन्ति।

सः अध्यापकः अस्ति, सः वदति।

ते बालकाः सन्ति, ते अपि वदन्ति।

## शब्दार्थाः

| | | |
|---|---|---|
| गम् (गच्छ्) | = जाना | (to go) |
| कन्या | = लड़की | (girl) |
| सा | = वह (*स्त्री.*) | (she, that—*fem.*) |
| सा | = वे दो (*स्त्री.*) | (they two—*fem.*) |
| ताः | = वे सब (*स्त्री.*) | (they all—*fem.*) |
| च | = और | (and) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meaning)—
कन्या चलति। ललनाः हसन्ति। उर्मिला गच्छति। बालिकाः अपि गच्छन्ति। कन्ये पठतः। ते खेलतः। ते खेलन्ति।

2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents)—
विद्यार्थी (student), लड़की (girl), दो स्त्रियाँ (two women), बालिकाएँ (girls), जाना (to go), बोलना (to speak), खेलना (to play).

### लिखितम्

3. हिन्दी में अर्थ लिखिए (Give meanings in English)—
बालकौ, कन्ये, ललनाः, सा गच्छति, गजाः, अश्वौ, बालिका, ते वदतः, ताः नमन्ति।

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. उर्मिला हँसती है। | 1. Urmila laughs. |
| 2. दो लड़कियाँ जा रही हैं। | 2. Two girls are going. |
| 3. स्त्रियाँ बोल रही हैं। | 3. Women are speaking. |
| 4. छात्राएँ लिख रही हैं। | 4. Female students are writing. |
| 5. गोपाल पढ़ रहा है। | 5. Gopal is studying. |
| 6. अध्यापिका भी पढ़ रही है। | 6. The woman teacher is also studying. |

| अध्यायः 8 | # अकारान्त-नपुँसकलिंगम् |
|---|---|


कमलम्


फलम्


नेत्रम्


गृहम्


वस्त्रम्


पुष्पम्


पुस्तकम्



रुप्यकम्


पत्रम्



मुखम्



शस्त्रम्



चक्रम्



उद्यानम्



भूषणम्



मित्रम्

## शब्दार्थाः

| | | |
|---|---|---|
| कमलम् | = कमल का फूल | (lotus flower) |
| फलम् | = फल | (fruit) |
| नेत्रम् | = आँख | (eye) |
| गृहम् | = घर | (house) |
| वस्त्रम् | = कपड़ा | (cloth, garment) |
| पुष्पम् | = फूल | (flower) |
| पुस्तकम् | = किताब | (book) |
| रुप्यकम् | = रुपया | (rupee) |
| पत्रम् | = पत्ता, चिट्ठी | (leaf, letter) |
| मुखम् | = मुँह | (mouth, face) |
| शस्त्रम् | = हथियार | (weapon) |

| | | |
|---|---|---|
| चक्रम् | = पहिया | (wheel) |
| उद्यानम् | = बाग | (garden, lawn) |
| भूषणम् | = ज़ेवर | (ornament) |
| मित्रम् | = दोस्त | (friend) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meaning)—
आम्रम्, रुप्यकम्, उद्यानम्, भूषणम्, पत्रम्, गृहम्, शस्त्रम्।

2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents)—
कमल (lotus), आँख (eye), फूल (flower), रुपया (rupee), पहिया (wheel).

### लिखितम्

3. पुँल्लिंग, स्त्रीलिंग और नपुँसकलिंग शब्दों को अलग-अलग लिखिए (Write separately words of different genders)—
मुखम्, गजः, प्रभा, बालः, वस्त्रम्, गृहम्, मित्रम्, अध्यापिका, लता, निर्मला, रुप्यकम्, अश्वः, सिंहः, रमा।

4. हर चित्र के नीचे उसका संस्कृत शब्द लिखिए (Give the Sanskrit equivalent below each picture)—



.................... .................... .................... ....................



.................... .................... .................... ....................

अध्यायः 9

# प्रथमपुरुष-नपुंसकलिंगम्

पत् दृश् (पश्य्) तत् ते तानि अत्र तत्र प्रातः



फलम् पतति।
फले पततः।
फलानि पतन्ति।

मित्रम् पश्यति।
मित्रे पश्यतः।
मित्राणि पश्यन्ति।



शंस्त्रम् रक्षति।
शस्त्रे राक्षतः।
शस्त्राणि रक्षन्ति।

तत् मित्रम् रक्षति।
ते चक्रे चलतः
तानि पुष्पाणि पतन्ति।

तत् पुस्तकम् अस्ति।
ते पुस्तके स्तः।
तानि पुस्तकानि सन्ति।

बालः अत्र पश्यति।
सिंहौ तत्र गर्जतः।
पिकाः प्रातः कूजन्ति।

## शब्दार्थाः

| | | |
|---|---|---|
| पत् | = गिरना | (to fall) |
| दृश् (पश्य्) | = देखना | (to see) |
| तत् | = वह (नपुँ.) | (that—*neuter gender*) |
| ते | = वे दो (नपुँ.) | (they two—*neuter gender*) |
| तानि | = वे सब (नपुँ.) | (they—*neuter gender*) |
| तत्र | = वहाँ | (there) |
| प्रातः | = सवेरे | (in the morning) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings)—
गृहम्, नेत्रे, पत्राणि, चक्रे, शस्त्राणि, भूषणम्, फले, सः, ताः, तानि, ते, तौ, अश्वौ, कन्ये, पतन्ति, रक्षतः, पश्यन्ति, गच्छति।

2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents)—
पत्र (leaf), दो शस्त्र (two weapons), सब वस्त्र (all clothes), मुख (mouth), बाग (garden), वह (he), वे दो (those two), स्त्रियाँ (women).

### लिखितम्

3. हिन्दी में अर्थ लिखिए (Write meaning in English)—
नेत्रे पश्यतः। पत्रम् पुष्पम् च पततः। तानि शस्त्राणि रक्षन्ति। चक्रे चलतः। प्रातः रमा गच्छति। श्यामः पठति। उर्मिला लिखति। सः नरः पश्यति।

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. पत्ता गिरता है। | 1. A leaf falls. |
| 2. दो आँखें देखती हैं। | 2. Two eyes see. |
| 3. शस्त्र रक्षा करते हैं। | 3. Weapons protect. |
| 4. छात्र वहाँ खेलते हैं। | 4. Students play there. |
| 5. दो कन्याएँ यहाँ हँस रही हैं। | 5. Two girls are laughing here. |
| 6. पहिया चलता है। | 6. The wheel moves. |

□□□

अध्यायः 10

# मध्यमपुरुष-एकवचनम्

वार्तालापः खाद् धाव् तृ (तर्) भ्रम् त्वम् असि

*(वार्तालापः)*



राधा — त्वम् खादसि।

सीता — त्वम् अपि खादसि।

माधवी — त्वम् अत्र पठसि।

कपिला — त्वम् कुत्र पठसि ?

रामः — त्वम् अत्र तरसि।

श्यामः — त्वम् कुत्र तरसि ?



जयन्तः — त्वम् भ्रमसि।

माधवः — त्वम् न भ्रमसि।

कृषकः — त्वम् अध्यापिका असि।

अध्यापिका — त्वम् कृषकः असि।

ललिता — सः भ्रमति, त्वम् न भ्रमसि।

रामः — तौ खादतः, त्वम् न खादसि।

जयन्तः — ते धावन्ति, त्वम् न धावसि।

राधा — सः छात्रः अस्ति, त्वम् छात्रः न असि।

माधवी — तौ कृषकौ स्तः, त्वम् कृषकः न असि।

ललिता — ताः अध्यापिकाः सन्ति, त्वम् अध्यापिका न असि।

## शब्दार्थाः

| | | |
|---|---|---|
| वार्तालापः | = बातचीत | (conversation) |
| कुत्र | = कहाँ | (where) |
| धाव् | = भागना | (to run) |
| खाद् | = खाना | (to eat) |
| तृ (तर्) | = तैरना | (to swim) |
| भ्रम् | = घूमना | (to roam about) |
| त्वम् | = तुम | (you) |
| असि | = (तुम) हो | (are—*you*) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meaning)—
सा न खादति। सा धावति। त्वम् अपि धावसि। त्वम् न भ्रमसि। नृपः अपि न भ्रमति। त्वम् तरसि। तौ न तरतः। त्वम् भक्तः असि।

2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents)—
बातचीत (conversation), तैरना (to swim), सुबह (morning), वे दो—स्त्री.(those two—*fem.*), किसान (farmer), बगीचा (lawn).

### लिखितम्

3. प्रत्येक वाक्य को तीन बार लिखिए (Write each sentence three times)—
लता अपि न तरति।
ललना न भ्रमति।
त्वम् भ्रमसि।
त्वम् नृपः न असि।

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. तुम घूमते हो। | 1. You wander around. |
| 2. किसान भी तैरते हैं। | 2. Farmers also swim. |
| 3. शारदा नहीं घूमती है। | 3. Sharda does not roam about. |
| 4. मोर नहीं तैरते हैं। | 4. Peacocks do not swim. |

5. वाक्य पूरे कीजिए (Complete the sentences)—

सः . . . . . . . . . . . ।

त्वम् न . . . . . . . . . . . ।

. . . . . . . . . . . चलतः ।

खट्वा अपि . . . . . . . ।

□□□

| अध्यायः 11 | # मध्यमपुरुष-द्विवचनम् |
|---|---|

श्याम हरित श्वेत मूर्ख प्राज्ञ काकः

शुकः हंसः युवाम् स्थः जलम् पा (पिब्)

## (वार्तालापः)



*(खगौ वदतः)*

शुकः — त्वम् पिकः असि।
त्वम् श्यामः असि।
काकः अपि श्यामः अस्ति।
युवाम् श्यामौ स्थः।

पिकः — त्वम् शुकः असि।
त्वम् हरितः असि।
हंसः श्वेतः अस्ति।
युवाम् श्यामौ न स्थः।



*(बालकौ वदतः)*

विनोदः — त्वम् छात्रः असि।
सः उमेशः अपि छात्रः अस्ति।
युवाम् छात्रौ स्थः।

प्रमोदः — त्वम् पठसि।
सः रमेशः अपि पठति।
युवाम् पठथः। युवाम् मूर्खौ न स्थः।
युवाम् प्राज्ञौ स्थः।

*(बालिकाः वदन्ति)*

**माया** — त्वम् उमा असि। त्वम् मेधा असि। युवाम् जलम् पिबथः।

**मेधा** — त्वम् माया असि। त्वम् रमा असि। युवाम् अपि जलम् पिबथः।

**उमा** — त्वम् माया असि। त्वम् मेधा असि। युवाम् अपि जलम् पिबथः।

**रमा** — माया जलम् पिबति। त्वम् अपि जलम् पिबसि। युवाम् अपि जलम् पिबथः।

## शब्दार्थाः

| | | |
|---|---|---|
| श्याम | = काला | (black) |
| काकः | = कौआ | (crow) |
| शुकः | = तोता | (parrot) |
| हरित | = हरा | (green) |
| हंसः | = हंस | (swan) |
| श्वेत | = सफ़ेद | (white) |
| युवाम् | = तुम दो | (you two) |
| स्थः | = हो *(तुम दो)* | (are—*you two*) |
| मूर्ख | = मूर्ख | (foolish) |
| प्राज्ञ | = बुद्धिमान | (intelligent) |
| जलम् | = पानी | (water) |
| पा (पिब्) | = पीना | (to drink) |

## अभ्यासः

### मौखिकम्

1. **पढ़िए और अर्थ बताइए** (Read and tell the meanings)—
युवाम् न पश्यथः। युवाम् न गच्छथः। युवाम् जलम् पिबथः। प्रमोदः अपि जलम् पिबति।

2. **संस्कृत-पर्याय बताइए** (Give Sanskrit equivalents)—
कौआ (crow), कोयल (Cuckoo), तुम दो (you two), पक्षी (bird), लड़का, (boy), लड़की (girl).

लिखितम्

3. प्रत्येक वाक्य को तीन बार लिखिए (Write each sentence three times)—
युवाम् जलम् न पिबथः। विनोदः जलम् पिबति। युवाम् अपि गच्छथः। युवाम् न पश्यथः।

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. तुम दोनों पानी पीते हो। | 1. Both of you drink water. |
| 2. तुम दोनों फल खाते हो। | 2. Both of you eat fruit. |
| 3. तुम दोनों वहाँ जाती हो। | 3. Both of you go there. |
| 4. तुम दोनों बुद्धिमान हो। | 4. Both of you are wise. |

5. वाक्य पूरे कीजिए (Complete the sentences)—

युवाम् ........ पिबथः।



........ गच्छथः।

पिकः न ..........।

सः अपि ..........।



| अध्यायः 12 | मध्यमपुरुष–बहुवचनम् |
|---|---|

अजः परस्परम् चर् यूयम् किम् वैद्यः सेवकः स्वस्थ प्रसन्न स्थ

*(छात्राः परस्परम् वदन्ति)*

**कपिलः** — त्वम् विनोदः असि। त्वम् महेन्द्रः असि। त्वम् शीला असि। यूयम् खेलथ।

**शीला** — त्वम् कपिलः असि। त्वम् दीपिका असि। त्वम् सुमित्रा असि। यूयम् पठथ।



*(वैद्यः सैनिकाः च परस्परम् वदन्ति)*

**वैद्यः** — यूयम् सैनिकाः स्थ। यूयम् स्वस्थाः स्थ।

**सैनिकाः** — ते सेवकाः स्वस्थाः न सन्ति।

**वैद्यः** — यूयम् सेवकाः प्रसन्नाः न स्थ।
यूयम् स्वस्थाः न स्थ ?



*(हंसाः पिकाः च परस्परम् वदन्ति)*

**हंसाः** — यूयम् पिकाः स्थ। यूयम् कूजथ।

**पिकाः** — यूयम् हंसाः स्थ। यूयम् तरथ।

| | | |
|---|---|---|
| अजः चरति। | अजौ चरतः। | अजाः चरन्ति। |
| त्वम् पठसि। | युवाम् पठथः। | यूयम् पठथ। |
| त्वम् सैनिकः असि। | युवाम् सैनिकौ स्थः। | यूयम् सैनिकाः स्थ। |

## शब्दार्थाः

| | | |
|---|---|---|
| अजः | = बकरा | (goat—*male*) |
| परस्परम् | = आपस में | (with one another) |
| चर् | = चरना | (to graze) |
| यूयम् | = तुम सब | (all of you) |
| वैद्यः | = चिकित्सक | (physician) |
| सेवकः | = नौकर | (servant) |
| स्वस्थ | = स्वस्थ | (healthy) |
| स्थ | = (*तुम सब*) हो | (are—*you all*) |

## अभ्यासः

### मौखिकम्

**1.** पढ़िए और अर्थ बताइए (Read and tell the meanings)—
गजः चरति। त्वम् वदसि। युवाम् पश्यथः। यूयम् पिबथ। विडालाः खादन्ति। यूयम् पतथ। यूयम् अपि प्रसन्नाः स्थ।

**2.** संस्कृत-पर्याय बताइए (Give Sanskrit equivalents)—
चिकित्सक, सैनिक, आपस में, नौकर, बकरा।

### लिखितम्

**3.** प्रत्येक वाक्य को दो-दो बार लिखिए (Write each sentence two times)—

यूयम् पिबथ। गजौ गच्छतः। अश्वः चरति। यूयम् पतथ। युवाम् पतथः। युवाम् चलथः। यूयम् चलथ। यूयम् पठथ।

**4.** संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. तुम सब पढ़ते हो। | 1. All of you study. |
| 2. वे सब चल रहे हैं। | 2. All of them are walking. |
| 3. तुम सब नहीं गिरती हो। | 3. All of you (*fem.*) do not fall. |

4. वह लिखता है। | 4. He writes.

5. तुम सब भक्त हो। | 5. All of you are devotees.

5. वाक्य पूरे कीजिए (Complete the sentences)—

यूयम् ............ ।

.............. पठथ।

यूयम् अपि .............. ।

.............. न चलथ।

यूयम् सैनिका : .............. ।

□□□

| अध्यायः 13 | उत्तमपुरुष-एकवचनम् |
|---|---|

# उत्तमपुरुष-एकवचनम्

अहम्     अस्मि     चित्रकारः     मालाकारः     शिक्षकः

*(छात्रः चित्रकारः मालाकारः च परस्परम् वदन्ति)*



छात्रः — त्वम् चित्रकारः असि ?

चित्रकारः — आम्, अहम् चित्रकारः अस्मि।

छात्रः — त्वम् चित्रम् रचयसि ?

चित्रकारः — आम्, अहम् चित्राणि रचयामि।
त्वम् छात्रः असि ?

छात्रः — आम्, अहम् छात्रः अस्मि।
किम् त्वम् मालाकारः असि ?

मालाकारः — आम्, अहम् मालाकारः अस्मि।

छात्रः — त्वम् मालाः रचयसि ?

मालाकारः — आम्, अहम् मालाः रचयामि।
किम् त्वम् संस्कृतम् पठसि ?

छात्रः — आम्, अहम् संस्कृतम् पठामि।



अहम् चित्रकारः अस्मि। अहम् मालाकारः अस्मि।
अहम् छात्रः अस्मि। अहम् शिक्षकः न अस्मि।
अहम् सैनिकः न अस्मि। अहम् कृषकः न अस्मि।
ते सैनिकाः न सन्ति। यूयम् अपि सैनिकाः न स्थ।

## शब्दार्था:

| | | | |
|---|---|---|---|
| आम् | = | हाँ | (yes) |
| अहम् | = | मैं | (I) |
| अस्मि | = | हूँ | (am) |
| चित्रकार: | = | चित्रकार | (painter) |
| मालाकार: | = | माला बनाने वाला | (garland-maker) |
| शिक्षक: | = | अध्यापक | (teacher) |
| किम् | = | क्या | (*a question maker word*) |

## अभ्यास:

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings)—
अहम् शिक्षक: न अस्मि। रविकुमार: मालाकार: अस्ति। यूयम् चित्रकारा: स्थ। युवाम् छात्रे स्थ:। अहम् वैद्य: अस्मि। अहम् प्रसन्न: अस्मि। अहम् गच्छामि।

2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents)—
माला बनाने वाला (garland-maker), चित्र बनाने वाला (painter), पढ़ाने वाला (teacher), तुम दो (you two), वे सब (they)।

### लिखितम्

3. वाक्य-पूर्ति कीजिए (Complete the sentences)—

(क) ········ शिक्षकौ स्थ:।

(ख) अहम् ········ खादामि।

(ग) सीता सुमीता च ··········।

(घ) ·········· छात्रा अस्मि।

**4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—**

| | |
|---|---|
| 1. मैं वहाँ खेलता हूँ। | 1. I play there. |
| 2. तुम दो यहाँ पढ़ते हो। | 2. You two study here. |
| 3. वे सब लिखते हैं। | 3. All of them write. |
| 4. मैं अध्यापक नहीं हूँ। | 4. I am not a teacher. |
| 5. मैं छात्र हूँ। | 5. I am a student. |

□□□

| अध्यायः 14 | उत्तमपुरुष-द्विवचनम् |
| --- | --- |

गै (गाय्) आवाम् स्वः गायकः गायिका





उमा प्रभा च – किम् युवाम् छात्रौ स्थः ?

संदीपः प्रदीपः च – आम्, आवाम् छात्रौ स्वः। आवाम् संस्कृतम् पठावः। किम् युवाम् अपि छात्रे स्थः ?

उमा प्रभा च – आवाम् अपि छात्रे स्वः। आवाम् अपि संस्कृतम् पठावः।

संदीपः प्रदीपः च – आवाम् गीतानि अपि गायावः। आवाम् गायकाः स्वः। किम् युवाम् अपि गीतानि गायथः ?

उमा प्रभा च – आम्, आवाम् अपि गीतानि गायावः। आवाम् अपि गायिके स्वः।

तौ भक्तौ स्तः। युवाम् भक्तौ स्थः। आवाम् अपि भक्तौ स्वः।
तौ नमतः। युवाम् नमथः। आवाम् अपि नमावः।

तौ सैनिकौ स्तः। युवाम् सैनिकौ स्थः। आवाम् अपि सैनिकौ स्वः।
तौ रक्षतः। युवाम् रक्षतः। आवाम् अपि रक्षावः।
तौ छात्रौ स्तः। युवाम् छात्रौ स्थः। आवाम् अपि छात्रौ स्वः।
तौ पठतः। युवाम् पठथः। आवाम् अपि पठावः।

## शव्दार्थाः

| | | |
|---|---|---|
| आवाम् | = हम दो | (we two) |
| स्वः | = हैं (*हम दो*) | (are—*we two*) |
| गायकः | = गाने वाला | (singer—*masc.*) |
| गायिका | = गाने वाली | (singer—*fem.*) |
| गै (गाय्) | = गाना | (to sing) |

## अभ्यासः

### मौखिकम्

1. पढ़िए (Read) —
आवाम् धावावः। आवाम् कृषकौ स्वः। आवाम् अत्र भ्रमावः। युवाम् भ्रमथः। युवाम् लिखथः। यूयम् खादथ। त्वम् वदसि। सा लिखति।

### लिखितम्

2. प्रत्येक वाक्य दो-दो बार लिखिए (Write each sentence two times)—
आवाम् चित्रकारौ स्वः। आवाम् मालाकारौ स्वः। अहम् शिक्षकः अस्मि। त्वम् भक्तः असि। आवाम् गायकौ स्वः।

3. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. वे फल हैं। | 1. These are fruits. |
| 2. वह गायक नहीं है। | 2. He is not a singer. |
| 3. हम दोनों पढ़ते हैं। | 3. Both of us study. |
| 4. बाग यहाँ है। | 4. The garden is here. |
| 5. मोहन गिरता है। | 5. Mohan falls. |
| 6. मैं और सुधीर सेवक हैं। | 6. Sudhir and I are servants. |
| 7. खाट यहाँ नहीं है। | 7. The cot is not here. |
| 8. बिलाव और बालक आपस में खेलते है। | 8. A cat and a boy play with each other. |
| 9. वे दो गायिकाएँ हैं। | 9. Those two are female singers. |

□□□

| अध्यायः 15 | # उत्तमपुरुष-बहुवचनम् |
|---|---|

लेखक कलाकारः प्रतिदिनम् नायकः नायिका



वयम् लेखकाः स्मः।
वयम् पठामः लिखामः च।

वयम् कलाकाराः स्मः।
वयम् गायामः हसामः च।

वयम् सैनिकाः स्मः।
वयम् स्वस्थाः स्मः।
वयम् प्रतिदिनम् धावामः तरामः च।



| | |
|---|---|
| सः नायकः अस्ति। | सा नायिका अस्ति। |
| तौ नायकौ स्तः। | ते नायिके स्तः। |
| ते नायकाः सन्ति। | ताः नायिकाः सन्ति। |
| त्वम् गायकः असि। | त्वम् गायिका असि। |
| युवाम् गायकौ स्थः। | युवाम् गायिके स्थः। |
| यूयम् गायकाः स्थ। | यूयम् गायिकाः स्थ। |
| अहम् सेवकः अस्मि। | अहम् सेविका अस्मि। |
| आवाम् सेवकौ स्वः। | आवाम् सेविके स्वः। |
| वयम् सेवकाः स्मः। | वयम् सेविकाः स्मः। |

## शब्दार्थाः

| | | |
|---|---|---|
| लेखकः | = लेखक | (writer) |
| कलाकारः | = कलाकार | (artist) |
| स्वस्थ | = स्वस्थ | (healthy) |
| प्रतिदिनम् | = प्रतिदिन | (everyday) |
| नायकः | = नायक | (leader—*masc.*) |
| नायिका | = नायिका | (leader—*fem.*) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings)—
वयम् भक्ताः स्मः। यूयम् कलाकाराः स्थ। अहम् जलम् पिबामि। सा नायिका अस्ति। ताः पश्यन्ति। वयम् रक्षामः।

2. अर्थ बताइए (Give meanings)—
खगः, शकटः, कूज् रमा, नेत्रम्, काकः।

### लिखितम्

3. प्रत्येक वाक्य दो-दो बार लिखिए (Write each sentence two times)—

अश्वः चलति। वयम् पश्यामः। पाठशाला तत्र न अस्ति। यूयम् किम् खादथ ?

4. स्त्रीलिंग बताइए (Give the feminine form)—

सेवकः ...............

छात्रः ...............

गायकः ...............

नायकः ...............

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

1. हम गाते हैं। — 1. We sing.
2. तुम सब हँसते हो। — 2. All of you laugh.
3. लड़कियाँ खेलती हैं। — 3. Girls play.
4. हम सब प्रातः घूमते हैं। — 4. All of us go around in the morning.
5. पत्र वहाँ नहीं है। — 5. The letter is not there.
6. हम चित्रकार हैं। — 6. We are painters
7. मैं प्रसन्न हूँ। — 7. I am happy.

□□□

| अध्यायः 16 | |
|---|---|

# लृट्लकारः

अस्     भू (भव्)     प्रकाशः

सः पठिष्यति।

तौ पठिष्यतः।

ते पठिष्यन्ति।



| | |
|---|---|
| रामः चलति। | रामः चलिष्यति। |
| छात्रौ वदतः। | छात्रौ वदिष्यतः। |
| नराः हसन्ति। | नराः हसिष्यन्ति। |

त्वम् खेलिष्यसि।

युवाम् खेलिष्यथः।

यूयम् खेलिष्यथ।



| | |
|---|---|
| त्वम् रक्षसि। | त्वम् रक्षिष्यसि। |
| युवाम् गर्जथः। | युवाम् गर्जिष्यथः। |
| यूयम् पतथ। | यूयम् पतिष्यथ। |

अहम् खादिष्यामि।

आवाम् खादिष्यावः।

वयम् खादिष्यामः।

| | |
|---|---|
| अहम् धावामि। | अहम् धाविष्यामि। |
| आवाम् तरावः। | आवाम् तरिष्यावः। |
| वयम् तरामः। | वयम् तरिष्यामः। |
| छात्रः लिखति। | छात्रः लेखिष्यति। |
| लता गच्छति। | लता गमिष्यति। |
| भक्तः नमति। | भक्तः नंस्यति। |
| नरः पश्यति। | नरः द्रक्ष्यति |
| प्रकाशः अस्ति। | प्रकाशः भविष्यति। |

## शब्दार्थाः

| | | |
|---|---|---|
| अस् | = होना | (to be) |
| भू (भव्) | = होना | (to be, to become) |
| प्रकाशः | = रोशनी | (light) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings)—
सुनीलः हसिष्यति। सिंहः गर्जिष्यति। खगाः कूजिष्यन्ति। गृहम् पतिष्यति। अश्वौ तरिष्यतः। बालिकाः द्रक्ष्यन्ति।

### लिखितम्

2. प्रत्येक वाक्य दो-दो बार लिखिए (Write each sentence two times)—
अजः चरिष्यति। सेविकाः धाविष्यन्ति। आवाम् गमिष्यावः। वयम् नंस्यामः। ताः खादिष्यन्ति।

3. वर्तमान काल और भविष्यत् काल के वाक्य अलग-अलग कीजिए (Separate present tense sentences from future tense sentences)—
बालाः नंस्यन्ति। भक्तः पश्यति। आवाम् द्रक्ष्यावः। मयूरः अस्ति। वयम् तरिष्यामः। वयम् सेवकाः स्मः। यूयम् लेखिष्यथ। सा नमति। ताः हसिष्यन्ति। छात्राः वदिष्यन्ति। सेवकौ खादतः। अहम् पिबामि। अश्वाः चरिष्यन्ति। यूयम् पतथ। ते खादिष्यतः। तौ धावतः। अहम् तरामि।

**4.** संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

| | |
|---|---|
| 1. हम भी चलेंगे। | 1. We shall also go. |
| 2. तुम वहाँ जाते हो। | 2. You go there. |
| 3. गुफा यहाँ होगी। | 3. The cave will be here. |
| 4. मोर भागेंगे। | 4. Peacocks will run. |
| 5. वैद्य देखेगा। | 5. The doctor will see *(it)*. |
| 6. चित्रकार जाएगा। | 6. The artist will go |
| 7. वे दो तैरेंगी। | 7. Those two (girls) will swim. |
| 8. तुम सब नमस्कार करोगे। | 8. All of you will salute. |

□□□

| अध्यायः 17 | # कर्मकारकम् (द्वितीया विभक्तिः) |
|---|---|

लेखः पथिकः दुग्धम् भोजनम् घासः ग्रामः कूपः विना



बालः लेखम् लिखति।
बालः लेखौ लिखति।
बालः लेखान् लिखति।

पथिकः सिंहम् पश्यति।
पथिकः सिंहौ पश्यति।
पथिकः सिंहान् पश्यति।

बालिका फलम् खादिष्यति।
बालिका फले खादिष्यति।
बालिका फलानि खादिष्यति।



कृष्णः दुग्धम् पिबति।
बालौ भोजनम् खादतः।
अश्वाः घासम् खादन्ति।

सः जलम् पिबति।
त्वम् जलम् पिबसि।
अहम् जलम् पिबामि।

एषः ग्रामः अस्ति, रामः ग्रामम् गच्छति।
एषः कूपः अस्ति, पद्मा कूपम् गच्छति।
छात्राः पुस्तकम् विना न पठिष्यन्ति।
पथिकाः भोजनम् विना न चलिष्यन्ति।

## शब्दार्थाः

| | | |
|---|---|---|
| लेखः | = लेख | (essay, article) |
| पथिकः | = यात्री | (traveller) |
| दुग्धम् | = दूध | (milk) |
| भोजनम् | = भोजन | (food) |
| घासः | = घास | (grass) |
| ग्रामः | = गाँव | (village) |
| एषः *(पुँ.)* | = यह | (this) |
| कूपः | = कूआँ | (water-well) |
| विना | = बिना | (without) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings)—
छात्राः लेखम् लेखिष्यन्ति पठिष्यन्ति च। वयम् फलानि न खादामः। सः मयूरम् पश्यति। नृपः सेवकम् वदति। कलाकाराः उद्यानम् गच्छन्ति।

### लिखितम्

2. प्रत्येक वाक्य दो-दो बार लिखिए (Write each sentence two times) —
शकटः ग्रामम् गमिष्यति। तौ पुस्तकम् पठतः। बालाः सिंहम् पश्यन्ति। अहम् हस्तम् पश्यामि।

3. कोष्ठक में दिए शब्द में उचित विभक्ति लगाकर वाक्य पूरा कीजिए (Affix appropriate vibhakti to the words within parenthesis and complete the sentences) —
नराः ……… (पथिक) पश्यन्ति।
शिक्षकः ……… (पुस्तक) पठति।
बालाः ……… (दुग्ध) पिबन्ति।
वयम् ……… (फल) खादामः।
यूयम् ……… (भोजन) खादिष्यथ।

**4.** संस्कृत में अनुवाद कीजिए। (Translate into Sanskrit) —

| | |
|---|---|
| 1. तुम दोनों यहाँ हँस रहे हो। | 1. Both of you are laughing here. |
| 2. सैनिक राजा की रक्षा करते हैं। | 2. Soldiers guard the king. |
| 3. सरस्वती छात्रों की रक्षा करती है। | 3. Sarasvati protects students. |
| 4. तुम पुस्तक पढ़ते हो और लेख लिखते हो। | 4. You read the book and write an article. |
| 5. हम दोनों वैद्य को कहते हैं। | 5. Both of us tell the doctor. |
| 6. सेवक किसानों को नमस्कार करते हैं। | 6. Servants salute the farmers. |

□□□

# अध्यायः 18 करणकारकम् (तृतीया विभक्तिः)

जीव्  दा (यच्छ्)  आ+गम् (गच्छ्)  खड्गः  पादः  तापसः  जनकः  सह



छात्राः कलमेन लिखन्ति।
सैनिकाः खड्गेन रक्षन्ति।
अश्वाः घासेन जीवन्ति।

वयम् नेत्राभ्याम् पश्यामः।
वयम् पादाभ्याम् चलामः।
वयम् हस्ताभ्याम् नमामः।

सिंहाः पादैः धावन्ति।
तापसाः फलैः जीवन्ति।
ते शकटैः आगच्छन्ति।



गजः जलेन जीविष्यति।
बालौ कलमाभ्याम् लेखिष्यतः।
विडालाः पादैः धाविष्यन्ति।

कृषकः ग्रामम् गच्छति,
सः तत्र अश्वेन गच्छति।
हंसः जलम् पिबति,
सः तत् मुखेन पिबति।

छात्राः छात्रैः सह खेलन्ति।
भोजनेन सह जलम् अस्ति।
बालः जनकेन सह गच्छति।
वैद्येन सह सेवकः आगच्छति।

## शब्दार्थाः

| | | |
|---|---|---|
| खड्गः | = तलवार | (sword) |
| जीव् | = जीना | (to be alive) |
| पादः | = पैर | (foot) |
| दा (यच्छ्) | = देना | (to give) |
| तापसः | = तपस्वी | (ascetic) |
| आ+गम् (गच्छ्) | = आना | (to come) |
| जनकः | = पिता | (father) |
| सह | = साथ | (with) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings) —
छात्रा जलम् हस्तेन पिबति। नराः मित्रैः सह खेलन्ति। वयम् शस्त्रम् द्रक्ष्यामः। श्वेतः हंसः कमलम् पश्यति। यूयम् ग्रामम् शकटेन गच्छथ। ते उद्यानम् पादाभ्याम् आगच्छतः।

2. पढ़िए और अर्थ बताइए (Read and tell the meanings) —
ते अत्र आगमिष्यन्ति। बालाः भोजनम् खादिष्यन्ति। वयम् हस्ताभ्याम् जलम् पास्यामः। ताः नेत्राभ्याम् पुस्तकानि पठिष्यन्ति। त्वम् कलमेन लेखान् लेखिष्यसि। वयम् रुप्यकानि यच्छामः।

### लिखितम्

3. हर एक शब्द से एक वाक्य बनाइए (Use each word in a sentence)—
कुक्कुरम्, परस्परम्, श्यामः, सैनिकान्, भूषणम्, वस्त्राणि।

4. रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks) —
ललनाः ·········· आगच्छन्ति।
सः प्रातः ·········· गच्छति।

मूर्खः .................. न पठति।
नराः .................. नमन्ति।
वयम् .................. पास्यामः।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

1. हम जल मुख से पीते हैं। 1. We drink water with (our) mouth.
2. क्या तुम भक्तों के साथ जाओगे ? 2. Will you go with the devotees ?
3. हम मित्रों के साथ खेलेंगे। 3. We will play with (our) friends.
4. मनुष्य आँखों से देखते हैं। 4. People see with (their) eyes.
5. वे पैरों से चलते हैं। 5. They walk with (their) feet.
6. तुम कलम से क्या लिख रहे हो ? 6. What are you writing with a pen ?

□□□

| अध्यायः 19 | सम्प्रदान-कारकम् (चतुर्थी विभक्तिः) |
|---|---|

**देशः नी (नय्) आ+नी (आनय्) ज्ञानम् कर्णः औषधम् पादत्राणम् धनिकः आपणः**



सूर्यः प्रकाशाय भवति।
पुस्तकम् ज्ञानाय भवति।
सैनिकः देशाय भवति।

वैद्यः रुग्णाभ्याम् औषधम् यच्छति।
बालिका पादाभ्याम् पादत्राणे नयति।
शिक्षकः छात्राभ्याम् पुस्तकम् आनयति।

धनिकः सेवकेभ्यः वस्त्राणि यच्छति।
छात्रः पुस्तकेभ्यः आपणम् गच्छति।
जनः फलेभ्यः उद्यानम् गच्छति।



शिक्षकः छात्राय ज्ञानम् यच्छति।
मालाकारः छात्राभ्याम् पुष्पाणि यच्छति।
सेवकः छात्रेभ्यः भोजनम् यच्छति।

एतत् दुग्धम् बालाय अस्ति।
एषः घासः अश्वाभ्याम् अस्ति।
एषा वाटिका छात्रेभ्यः अस्ति।

एषः बालः अस्ति। एषा बाला अस्ति। सेवकः बालम् नयति। सः बालम् अश्वेन नयति। अश्वः बालाय अस्ति।

एतत पत्रम् अस्ति। प्राज्ञः पत्रम् लिखति। सः पत्रम् कलमेन लिखति। कलमः प्राज्ञाय अस्ति।

## शब्दार्थाः

| | | |
|---|---|---|
| देशः | = देश | (country) |
| रुग्णः | = रोगी | (sick person) |
| ज्ञानम् | = ज्ञान | (knowledge) |
| कर्णः | = कान | (ear) |
| औषधम् | = दवाई | (medicine) |
| पादत्राणम् | = जूता | (shoe) |
| नी (नय्) | = ले जाना | (to carry) |
| आ + नी (आनय्) | = लाना | (to bring) |
| धनिकः | = धनी | (rich) |
| आपणः | = दुकान | (shop) |
| एषा (स्त्री.) | = यह | (this) |
| एतत् (नपुं.) | = यह | (this) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings) —
ज्ञानम् प्राज्ञाय भवति। सेवकः कर्णाभ्याम् औषधम् आनयति। धनिकः छात्रेभ्यः पुस्तकानि यच्छति। तापसः पथिकाय जलम् आनयति।

2. संस्कृत शब्द बताइए (Give Sanskrit equivalents) —
कान, पैर, दवा, दुकान, जूता, दो वस्त्र।

## लिखितम्

3. उचित विभक्ति लगा कर वाक्य पूरे कीजिए (Affix appropriate vibhaktis to the words given within parenthesis and complete the sentences) —

छात्रः ............... (अध्यापक) नमति।

काकः ............... (श्याम) अस्ति।

अहम् दुग्धम् ............... (बाल) यच्छामि।

गायकः ............... (कृष्ण) सह गच्छति।

............ (पुस्तक) विना सा न गच्छति।

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

1. सूरज के बिना प्रकाश नहीं होता है। — 1. There is no light without sun.
2. धनिक कलाकार को रुपये देता है। — 2. A rich man gives money to the artist.
3. वह तलवार राजा के लिए है। — 3. That sword is for the king.
4. वह भोजन के साथ जल देती है। — 4. She gives water with the food.
5. छात्र नायक के बिना नहीं जाएँगे। — 5. The students will not go without the leader.
6. वह दुकान कलाकारों के लिए है। — 6. This store is for artists.

□□□

## अध्यायः 20 अपादान-कारकम् (पञ्चमी विभक्तिः)

आ+चर् वृक्षः नगरम् भवनम् नीचैः कुतः
अधुना कुत्र यदा तदा



पथिकः नगरात् प्रातः आगच्छति।
ललना उद्यानात् फलानि आनयति।
पत्रम् वृक्षात् नीचैः पतति।

पथिकौ नगराभ्याम् प्रातः आगच्छतः।
ललने उद्यानाभ्याम् फलानि आनयतः।
फले वृक्षाभ्याम् नीचैः पततः।

पथिकाः नगरेभ्यः प्रातः आगच्छन्ति।
ललनाः उद्यानेभ्यः फलानि आनयन्ति।
पत्राणि वृक्षेभ्यः नीचैः पतन्ति।

*(वार्तालापः — कृष्णा विजया च परस्परम् वदतः)*



कृष्णा — त्वम् कुतः आगच्छसि ?
विजया— अहम् गृहात् आगच्छामि ?
कृष्णा — अधुना त्वम् कुत्र गमिष्यसि ?
विजया— अहम् आपणम् गमिष्यामि।
कृष्णा — त्वम् आपणात् किम् आनेष्यसि ?
विजया— अहम् ततः फलानि आनेष्यामि।
कृष्णा — त्वम् आपणात् कथम् आगमिष्यसि ?
विजया— अहम् ततः शकटेन आगमिष्यामि।

कृष्णा — किम् त्वम् फलानि खादिष्यसि ?
विजया— अहम् फलानि अनुजाय दास्यामि।
कृष्णा — किम् त्वम् न खादिष्यसि ?
विजया— यदा मम अनुजः फलानि खादिष्यसि,
तदा अहम् अपि फलानि खादिष्यामि।

## शब्दार्थाः

| | | |
|---|---|---|
| वृक्षः | = पेड़ | (tree) |
| नगरम् | = शहर | (city) |
| भवनम् | = मकान | (building) |
| नीचैः | = नीचे | (below) |
| कुतः | = कहाँ से | (from where) |
| अधुना | = अब | (now) |
| ततः | = वहाँ से | (from there) |
| यदा | = जब | (when) |
| तदा | = तब | (then) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings) —
ललना उद्यानात् आगच्छति। फले वृक्षाभ्याम् पततः। फलानि वृक्षेभ्यः नीचैः पतन्ति। अधुना त्वम् कुत्र गमिष्यसि ? अहम् नगरम् गमिष्यामि।

2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents) —
गाँव से (from a village) दो नगरों से (from two cities), पेड़ों से (from trees), आपस में (with each other), कहाँ (where), छोटा (small).

## लिखितम्

**3.** संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

| | |
|---|---|
| 1. तू शहर से क्या लाएगा ? | 1. What will you bring from the city ? |
| 2. मैं शहर से फूल लाऊँगा। | 2. I will bring flowers from the city. |
| 3. फल पेड़ों से गिरेंगे। | 3. Fruits will fall from trees. |
| 4. जब मेरा छोटा भाई आएगा, तब मैं भी आऊँगा। | 4. When my younger brother will come, then I will also come. |

**4.** निम्नलिखित शब्दों से वाक्य बनाइए (Use the following words in sentences)—
पथिकः, भवनम्, कुतः, किम्, दास्यति।

**5.** अपनी कापी में लिखिए (Write in your note-book)—

| | | | |
|---|---|---|---|
| (क) | सः गमिष्यति | तौ गमिष्यतः | ते गमिष्यन्ति |
| | त्वम् गमिष्यसि | युवाम् गमिष्यथः | यूयम् गमिष्यथ |
| | अहम् गमिष्यामि | आवाम् गमिष्यावः | वयम् गमिष्यामः |
| (ख) | ग्रामात् | ग्रामाभ्याम् | ग्रामेभ्यः |
| | अश्वात् | अश्वाभ्याम् | अश्वेभ्यः |
| | वृक्षात् | वृक्षाभ्याम् | वृक्षेभ्यः |
| | फलात् | फलाभ्याम् | फलेभ्यः |
| | भवनात् | भवनाभ्याम् | भवनेभ्यः |

(ग) इसी प्रकार सेवक और उद्यान के रूप भी पञ्चमी विभक्ति में लिखिए (Write similar forms of सेवक and उद्यान in the fifth vibhakti).

□□□

| अध्यायः 21 | # सम्बन्धकारकम् (षष्ठी विभक्तिः) |
|---|---|

विद्यालयः गन्धः मधुर वर्णः दिनम् मम तव तस्य तस्याः नाम आरम्भः



नृपस्य सेवकः गच्छति।
नगरस्य वैद्यौ आगच्छतः।
विद्यालयस्य छात्राः धावन्ति।

बालयोः गृहम् अत्र अस्ति।
पादयोः पादत्राणे तत्र स्तः।
कृषकयोः गृहम् तत्र अस्ति।

हंसानम् वर्णः श्वेतः भवति।
पिकानाम् वर्णः कृष्णः भवति।
काकानाम् अपि वर्णः कृष्णः भवति।



पिकस्य मुखम् कृष्णम् अस्ति।
छात्रयोः पाठशाला कुत्र अस्ति ?
पुष्पाणाम् गन्धः मधुरः भवति।

सः तव मित्रम्। तस्य नाम किम् अस्ति ?
सः मम मित्रम्। तस्य नाम प्रदीपः अस्ति।
सा तस्याः मित्रम्। तस्याः नाम किम् अस्ति ?
सा तस्याः मित्रम्। तस्याः नाम शीला अस्ति।

प्रातः दिनस्य आरम्भः भवति। मोहनः मम गृहम् आगच्छति। मोहनः मम मित्रम् अस्ति। मोहनः अहम् च उद्यानम् गमिष्यावः। आवाम् तत्र परस्परं खेलिष्यावः।

## शब्दार्थाः

| | | |
|---|---|---|
| विद्यालयः | = स्कूल | (school) |
| गन्धः | = बू | (smell) |
| मधुर | = मीठा | (sweet) |
| वर्णः | = रंग | (colour) |
| दिनम् | = दिन | (day) |
| मम | = मेरा | (my) |
| तव | = तेरा | (your) |
| तस्य (पु.) | = उसका | (his) |
| तस्याः (स्त्री.) | = उसका | (her) |
| नाम | = नाम | (name) |
| आरम्भः | = आरम्भ | (beginning) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings) —
ग्रामस्य नायकः गच्छति। उद्यानस्य भूषणम् पुष्पाणि सन्ति। मम विद्यालयः तत्र अस्ति। अहम् मोहनस्य मित्रम् अस्मि।

2. निम्नलिखित शब्दों की संस्कृत बताइए (Give Sanskrit equivalents) —
रंग (colour), उसका (*स्त्रीलिंग*) (her), मेरा (my), नाम (name), शेर का (lion's), दो बालकों का (of two boys)।

### लिखितम्

3. हिंदी में अर्थ लिखिए (Give the meanings in English) —
विद्यालयस्य छात्राः धावन्ति। तव जनकः आगच्छति। प्रातः दिनस्य आरम्भः भवति। गजानाम् भोजनम् किम् भवति ? शकटस्य चक्रे चलतः।

4. अपनी कापी में ये रूप लिखिए (Write the following forms in your notebook) —

| | | |
|---|---|---|
| ग्रामस्य | ग्रामयोः | ग्रामाणाम् |
| काकस्य | काकयोः | काकानाम् |
| नेत्रस्य | नेत्रयोः | नेत्राणाम् |

इसी प्रकार वृक्ष, भवन और कर्ण के रूप भी लिखिए (Give similar forms for वृक्ष, भवन and कर्ण)।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

1. राम का पिता दवा लाता है। — 1. Ram's father brings the medicine.
2. गोविन्द प्रमोद के साथ खेलता है। — 2. Govind plays with Pramod.
3. मेरे नगर का नाम पुणे है। — 3. The name of my city is Pune.
4. तुम्हारे गाँव का नाम क्या है? — 4. What is the name of your village ?
5. वृक्षों के फल नीचे गिरते हैं। — 5. Fruits of the trees fall down.
6. पुष्पों की गन्ध मधुर है। — 6. The smell of the flowers is sweet.

□□□

| अध्यायः 22 | अधिकरण-कारकम् (सप्तमी विभक्तिः) |
|---|---|

वनम्  मार्गः  अंगुष्ठः  मत्स्यः  सरोवरः  वस्  छात्रावासः  किमर्थम्



सिंहः वने भ्रमति।
गजौ मार्गे चलतः।
अश्वाः नगरे धावन्ति।

हस्तयोः अंगुष्ठौ स्तः।
पादयोः अपि अंगुष्ठौ स्तः।
कर्णयोः भूषणे स्तः।



मत्स्याः सरोवरेषु तरन्ति।
नराः गृहेषु वसन्ति।
छात्राः विद्यालयेषु पठन्ति।

*(वार्तालापः)*

**विनोदः** — त्वम् कुत्र वससि ?
**प्रमोदः** — अहम् गृहे वसामि। त्वम् कुत्र वससि ?
**विनोदः** — अहम् तु छात्रावासे वसामि।
**प्रमोदः** — बालाः गृहेषु एव वसन्ति, त्वम् किमर्थम् छात्रावासे वससि ?
**विनोदः** — मम जनकः प्रयागे वसति। अत्र न वसति। अतः अहम् अत्र विद्यालये पठामि, छात्रावासे च वसामि।

## शब्दार्थाः

| | | |
|---|---|---|
| वनम् | = जंगल | (jungle) |
| मार्गः | = रास्ता | (path, way) |
| अंगुष्ठः | = अंगूठा | (thumb, big toe) |
| मत्स्यः | = मछली | (fish) |
| सरोवरः | = तालाब | (pool, tank) |
| वस् | = रहना | (to live) |
| छात्रावासः | = छात्रावास | (hostel) |
| किमर्थम् | = किस लिए | (what for, why) |

## अभ्यासः

### मौखिकम्

1. इस पाठ को शुद्ध उच्चारण के साथ पढिए (Read this lesson with correct pronunciation)।
2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents) —
   जंगल (jungle), शेर (lion), शहर (city), अँगूठा (thumb), किताब (book), छात्रावास (hostel)

### लिखितम्

3. इस पाठ के वार्तालाप अंश को लिखिए (Write the conversation part of this lesson)
4. वाक्य-पूर्ति कीजिए (Complete the sentences) —
   त्वम् कुत्र ............ ?
   अहम् ............ वसामि।
   मम् मित्रम् नगरे ............।
   बालिकाः ........ पठन्ति।

**5.** संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

| | |
|---|---|
| 1. तुम कहाँ रहते हो ? | 1. Where do you live ? |
| 2. यह गाँव में रहती है। | 2. She lives in a village. |
| 3. हम सब शहर में रहते हैं | 3. All of us live in a city. |
| 4. शेर जंगलों में रहते हैं। | 4. Lions live in jungles. |
| 5. विद्यार्थी स्कूल में पढ़ते हैं। | 5. Students study in a school. |
| 6. मछलियाँ तालाब में तैरती हैं। | 6. Fish swim in a pool. |

□□□

अध्यायः 23

# सम्बोधनम्

गुरुदेवः संस्कृतम् कः क्षेत्रम् बीजम् वृथा गर्वित

शिक्षकः – हे बालक, त्वम् किम् पठसि ?

बालकः – हे गुरुदेव, अहम् संस्कृतम् पठामि।

जनकः – हे पुत्रौ, युवाम् किम् खादथः ?

दिनेशः – जनक, अहम् फलम् खादामि।

महेशः – जनक, अहम् अपि फलम् खादामि। आवाम् फलानि खादावः।



नराः – हे सैनिकाः, किम् यूयम् देशम् रक्षथ ?

सैनिकाः – हे नराः, आम्, वयम् देशम् रक्षामः रक्षिष्यामः च।

*(पिकाः, शुकाः, मयूराः च परस्परम् वदन्ति)*

पिकः – हे शुक, मम वर्णः श्यामः अस्ति। तव कः वर्णः ?

शुकः – हे पिक, मम वर्णः हरितः अस्ति।

पिकः — हे मयूरौ, अहम् फलम् खादामि। युवाम् किम् खादथः ?

मयूरौ — हे पिक, आवाम् क्षेत्रेषु बीजानि खादावः।

पिकः — रे काकाः, वयम् मधुरम् वदामः यूयम् मधुरम् किमर्थम् न वदथ।

काकाः — रे पिकाः यूयम् वृथा गर्विताः स्थ।

## शब्दार्थाः

| | | |
|---|---|---|
| गुरुदेवः | = आचार्य | (respected teacher) |
| संस्कृतम् | = संस्कृत भाषा | (Sanskrit language) |
| कः *(पुँ.)* | = कौनसा, कौन | (which, who) |
| क्षेत्रम् | = खेत | (field) |
| बीजम् | = बीज | (seed) |
| वृथा | = बेकार में | (in vain, for nothing) |
| गर्वित | = घमण्डी | (proud, haughty) |

## अभ्यासः

### मौखिकम्

1. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents) —

   सिपाही (soldier), अध्यापक (teacher), खेत (field), खुश (happy), घमंडी (proud), बेकार में (in vain).

2. पूरे पाठ को शुद्ध उच्चारण के साथ पढ़िए (Read the entire lesson with correct pronunciation).

### लिखितम्

3. पक्षियों के वार्तालाप वाले अंश को लिखिए (Write the conversation between the birds).

4. वाक्य-पूर्ति कीजिए (Complete the sentences) —

............ यूयम् किमर्थम् न गच्छथ ?

शुकस्य वर्णः ............ अस्ति।

पिकस्य ............ श्यामः अस्ति।

............ देशम् अवश्यम् रक्षिष्यामः।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

1. अरे पथिक, तू कुएँ का जल किसलिए नहीं पीता ?
2. अरे सैनिक, तेरी तलवार क्यों गिर रही है ?
3. लेखको, तुम पुस्तकें क्यों नहीं लिखते ?
4. हे गायक, तुम क्यों नहीं गाते ?
5. हे वैद्य, तुम दवाई क्यों नहीं देते ?
6. हे बालको, तुम आपस में क्यों नहीं खेलते ?

1. Oh traveller, why don't you drink water of the well ?
2. Oh soldier, why is your sword falling ?
3. Oh writers, why don't you write books ?
4. Oh singer, why don't you sing ?
5. Oh doctor, why don't you give medicine ?
6. Oh boys, why don't you play with each other ?

□□□

## अध्यायः 24

# संख्या

कालः वेदः पाण्डवः भ्रमरः सप्ताहः लूता अंगम् ग्रहः



एकः = सूर्यः एकः भवति।

द्वौ = कर्णौ द्वौ भवतः।

त्रयः = कालाः त्रयः भवन्ति।

चत्वारः = वेदाः चत्वारः भवन्ति।

पञ्च = पाण्डवाः पञ्च सन्ति।

षट् = भ्रमरस्य षट् पादाः भवन्ति।

सप्त = सप्ताहे सप्त दिनानि भवन्ति।

अष्ट = लूतायाः अष्ट पादाः भवन्ति।

नव = ग्रहाः नव भवन्ति।

दश = पञ्च पञ्च च दश भवन्ति।

$$5+5=10$$

### शब्दार्थाः

| | | |
|---|---|---|
| कालः | = काल | (time) |
| वेदः | = वेद | (the Veda) |
| पाण्डवः | = पाण्डव | (the Pandava) |
| भ्रमरः | = भौंरा | (black bee) |
| सप्ताहः | = हफ़्ता | (week) |
| लूता | = मकड़ी | (spider) |
| अंगम् | = अंग | (limb) |
| ग्रहः | = ग्रह | (planet) |

## अभ्यासः

### मौखिकम्

1. संस्कृत में एक से दस तक गिनती सुनाइए (Count from one to ten in Sanskrit).

2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents) —
भौंरा (black bee), दो वेद (two Vedas), दो अंग (two limbs), आठ (eight), सूरज (sun), कान (ear).

### लिखितम्

3. एक से दस तक गिनती लिखिए (Write numbers from one to ten).

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

| | |
|---|---|
| 1. दो शेर एक वन में नहीं रहते हैं। | 1. Two lions do not live in one jungle. |
| 2. छह किसान खेतों को जा रहे हैं। | 2. Six farmers are going to fields. |
| 3. नौ विद्यार्थी विद्यालय में पढ़ते हैं। | 3. Nine students study in the school. |
| 4. सात तपस्वी नगर में घूम रहे हैं। | 4. Seven ascetics are wandering in the city. |
| 5. चार सैनिक गाँव की रक्षा करते हैं। | 5. Four soldiers protect the village. |

□□□

| अध्यायः 25 | ग्रामः |
|---|---|

सुन्दर आश्रमः ईश्वरः वानरः चणकः अग्रजः श्वः

ग्रामः सुन्दरः अस्ति। ग्रामे कूपाः सन्ति। तत्र जनाः जलम् पिबन्ति। बालकाः वृक्षेषु शुकान् पिकान् काकान् च पश्यन्ति। शुकाः हरिताः भवन्ति, पिकाः काकाः च श्यामाः भवन्ति।

ग्रामे एकः आश्रमः अपि अस्ति। आश्रमे तापसाः वसन्ति। ते प्रातः ईश्वरम् नमन्ति। ते भोजनाय वनात् फलानि आनयन्ति।



आश्रमे वानराः अपि भ्रमन्ति। ते चणकान् खादन्ति वृक्षात् च वृक्षम् गच्छन्ति।

अहम् ग्रामम् गमिष्यामि। मम अग्रजः अपि तत्र गमिष्यति। आवाम् तत्र श्वः गमिष्यावः। हे मित्र, किम् त्वम् अपि चलिष्यसि ?

तत्र नराः स्वस्थाः भवन्ति। वयम् अपि स्वस्थाः भविष्यामः।

## शब्दार्थाः

| | | |
|---|---|---|
| सुन्दर | = सुन्दर | (beautiful) |
| आश्रमः | = आश्रम | (hermitage) |
| ईश्वरः | = ईश्वर | (God) |
| वानरः | = बन्दर | (monkey) |
| चणकः | = चना | (gram, black chicpea) |
| अग्रजः | = बडा भाई | (elder brother) |
| श्वः | = कल (*आने वाला*) | (tomorrow) |

## अभ्यासः

### मौखिकम्

1. पढ़िए और अर्थ बताइए (Read and tell the meanings)—
ग्रामः सुन्दरः भवति। आश्रमे तापसाः वसन्ति। ते प्रातः ईश्वरम् नमन्ति। तापसेभ्यः नराः फलानि आनयन्ति।

2. संस्कृत शब्द बताइए (Give Sanskrit equivalents) —
दूध (milk), बड़ा भाई (elder brother), किसान (farmer), तोता (parrot), कूआँ (*water*-well), कल (tomorrow), आश्रम (hermitage)

### लिखितम्

3. मम ग्रामः विषय पर पाँच वाक्य संस्कृत में लिखिए (Write five sentences in Sanskrit about मम ग्रामः)।

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) —

| | |
|---|---|
| 1. गाँव में लोग कूएँ का पानी पीते हैं। | 1. In a village,people drink water from a well. |
| 2. किसान खेतों में जाते हैं। | 2. Farmers go to fields. |
| 3. मैं गाँव जाऊँगा। | 3. I will go to the village. |

| | |
|---|---|
| 4. तुम वहाँ खेलोगे। | 4. You will play there. |
| 5. बालक तपस्वियों को नमस्कार करते हैं। | 5. Boys salute the ascetics. |
| 6. क्या बन्दर चने खाएँगे ? | 6. Will monkeys eat grams ? |

5. निम्न प्रश्नों के उत्तर संस्कृत में दीजिए (Answer the following questions in Sanskrit)—

(क) ग्रामे जलं कुत्र भवति ? (ख) आश्रमे कः वसति ?

(ग) आश्रमे वानराः किं खादन्ति ? (घ) किं यूयम् ग्रामं गमिष्यथ ?

(ङ) आश्रमे तापसाः किं खादन्ति ?

□□□



| अध्यायः 26 | त्रयः धूर्ताः ब्राह्मणः च |
|---|---|

स्था (तिष्ठ्) अव+गम् (गच्छ) त्यज् पच् ब्राह्मणः धूर्त दूरे
प्रथम अग्रे द्वितीय अपवित्र तृतीय एवम्

एकः ब्राह्मणः गच्छति। सः अजम् नयति। त्रयः धूर्ताः ब्राह्मणम् पश्यन्ति। ते परस्परं वदन्ति—वयम् ब्राह्मणात् अजम् नेष्यामः। ते मार्गे दूरे दूरे तिष्ठन्ति।



प्रथमः धूर्तः वदति— हे ब्राह्मण, कुक्कुरं किमर्थम् नयसि ? ब्राह्मणः वदति— हे मूर्ख—एषः कुक्कुरः न अस्ति, एषः तु अजः अस्तिः। ब्राह्मणः अग्रे गच्छति। तत्र द्वितीयः धूर्तः वदति—हे हे ब्राह्मण, किम् आचरसि ? अपवित्रम् कुक्कुरम् नयसि ? ब्राह्मणः वदति— किम् त्वम् न पश्यसि ? एषः तु अजः अस्ति। अग्रे तृतीयः धूर्तः अपि एवम् वदति।

तदा ब्राह्मणः अजम् कुक्कुरम् एव अवगच्छति। सः अजम् त्यजति गच्छति च। धूर्ताः अजम् नयन्ति, पचन्ति खादन्ति च।

## शब्दार्थाः

| | | |
|---|---|---|
| ब्राह्मणः | = ब्राह्मण | (Brahmin) |
| धूर्तः | = ठग | (cheat) |
| दूरे | = दूरी पर | (at a distance) |
| स्था (तिष्ठ्) | = ठहरना | (to stay) |
| प्रथम | = पहला | (first) |
| अग्रे | = आगे | (ahead) |
| द्वितीय | = दूसरा | (second) |
| अपवित्र | = अपवित्र | (unpious) |
| तृतीय | = तीसरा | (third) |
| एवम् | = इस प्रकार | (like this) |
| अव+गम् (गच्छ्) | = समझना | (to understand) |
| त्यज् | = छोड़ना | (to leave) |
| पच् | = पकाना | (to cook) |

## अभ्यास :

### मौखिकम्

1. यह कथा अपने शब्दो में सुनाइए (Narrate this story in your own words).
2. संस्कृत-पर्याय बताइए (Give Sanskrit equivalents) —
ठग (cheat), पाँच (five), इस प्रकार (like this), (वह) समझता है (he understands), दो ब्राह्मण (two brahmins).

### लिखितम्

3. यह कथा सरल संस्कृत में लिखिए (Write this story in simple Sanskrit).

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

| | |
|---|---|
| 1. वहाँ एक ब्राह्मण रहता है। | 1. A Brahamin lives there. |
| 2. तीन ठग आते हैं। | 2. Three cheats come. |
| 3. ब्राह्मण मूर्ख है। | 3. The Brahmin is foolish. |
| 4. वह कुत्ता नहीं है, वह बकरा है। | 4. That is not a dog, that is a goat. |
| 5. बकरा सफेद है। | 5. The goat is white. |
| 6. हम बकरा नहीं खाएँगे। | 6. We will not eat a goat. |

□□□

# व्याकरणम्
# (Grammar)

## अकारान्त–पुँल्लिग–शब्दः

### बाल

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | बालः | बालौ | बालाः |
| द्वितीया ” | बालम् | ” | बालान् |
| तृतीया ” | बालेन | बालाभ्याम् | बालैः |
| चतुर्थी ” | बालाय | ” | बालेभ्यः |
| पंचमी ” | बालात् | ” | ” |
| षष्ठी ” | बालस्य | बालयोः | बालानाम् |
| सप्तमी ” | बाले | ” | बालेषु |
| सम्बोधनम् | हे बाल | हे बालौ | हे बालाः |

### नर

| | | | |
|---|---|---|---|
| प्रथमा विभक्तिः | नरः | नरौ | नराः |
| द्वितीया ” | नरम् | ” | नरान् |
| तृतीया ” | नरेण | नराभ्याम् | नरैः |
| चतुर्थी ” | नराय | ” | नरेभ्यः |
| पंचमी ” | नरात् | ” | ” |
| षष्ठी ” | नरस्य | नरयोः | नराणाम्* |
| सप्तमी ” | नरे | ” | नरेषु |
| सम्बोधनम् | हे नर | हे नरौ | हे नराः |

*यदि शब्द में 'र' वर्ण हो तो प्रायः 'न्' को 'ण्' हो जाता है। जैसे 'नराणाम्' लेकिन शब्द के अन्तिम 'न्' को 'ण्' नहीं होता, जैसे—नरान् (with र present in a word, न् usually becomes ण् except when it is the last letter in a word).

## अकारान्त–नपुँसकलिंग–शब्दः

### फल

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | फलम् | फले | फलानि |
| द्वितीया " | " | " | " |
| तृतीया " | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी " | फलाय | " | फलेभ्यः |
| पंचमी " | फलात् | " | " |
| षष्ठी " | फलस्य | फलयोः | फलानाम् |
| सप्तमी " | फले | " | फलेषु |
| सम्बोधन | हे फल | हे फले | हे फलानि |

## नियमित–धातुः पठ् (पढ़ना to study/read)

### लट्लकारः (वर्तमान काल Present Tense)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

## लृट्लकारः (भविष्य काल Future Tense)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

# अर्धनियमित-धातुः दृश् (पश्य् to see)

## लट्लकारः (वर्तमान काल Present Tense)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | पश्यति | पश्यतः | पश्यन्ति |
| मध्यमपुरुषः | पश्यसि | पश्यथः | पश्यथ |
| उत्तमपुरुषः | पश्यामि | पश्यावः | पश्यामः |

## लृट्लकारः (भविष्य काल Future Tense)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यमपुरुषः | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तमपुरुषः | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

# अनियमित-धातुः अस् (होना to be)

## लट्लकारः (वर्तमान काल Present Tense)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः |

## लृट्लकारः (भविष्य काल Future Tense)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

# धातवः

यहाँ धातुओं के तीन भाग किए गए हैं— नियमित, अर्धनियमित और अनियमित। नीचे हर धातु का केवल प्रथमपुरुष एकवचन रूप ही दिया गया है (Verb-roots are divided here into *regular*, *semi-regular*, and *irregular*. Only third person singular form of each is given below)—

## नियमिताः

| क्रमांकः | धातुः | लट् | लृट् |
|---|---|---|---|
| 1. | चल् | चलति | चलिष्यति |
| 2. | पठ् | पठति | पठिष्यति |
| 3. | खेल् | खेलति | खेलिष्यति |
| 4. | रक्ष् | रक्षति | रक्षिष्यति |
| 5. | वद् | वदति | वदिष्यति |
| 6. | हस् | हसति | हसिष्यति |
| 7. | क्रन्द् | क्रन्दति | क्रन्दिष्यति |
| 8. | गर्ज् | गर्जति | गर्जिष्यति |
| 9. | कूज् | कूजति | कूजिष्यति |
| 10. | पत् | पतति | पतिष्यति |
| 11. | खाद् | खादति | खादिष्यति |

| | | | |
|---|---|---|---|
| 12. | धाव् | धावति | धाविष्यति |
| 13. | भ्रम् | भ्रमति | भ्रमिष्यति |
| 14. | चर् | चरति | चरिष्यति |
| 15. | जीव् | जीवति | जीविष्यति |

## अर्धनियमिता:

| | | | |
|---|---|---|---|
| 1. | लिख् | लिखति | लेखिष्यति |
| 2. | नम् | नमति | नंस्यति |
| 3. | गम् (गच्छ्) | गच्छति | गमिष्यति |
| 4. | दृश् (पश्य्) | पश्यति | द्रक्ष्यति |
| 5. | तृ (तर्) | तरति | तरिष्यति |
| 6. | पा (पिब्) | पिबति | पास्यति |
| 7. | गै (गाय्) | गायति | गास्यति |
| 8. | भू (भव्) | भवति | भविष्यति |
| 9. | दा (यच्छ्) | यच्छति | दास्यति |
| 10. | नी (नय्) | नयति | नेष्यति |
| 11. | वस् | वसति | वत्स्यति |
| 12. | स्था (तिष्ठ्) | तिष्ठति | स्थास्यति |
| 13. | त्यज् | त्यजति | त्यक्ष्यति |
| 14. | पच् | पचति | पक्ष्यति |

## अनियमिता:

| | | | |
|---|---|---|---|
| 1. | अस् | अस्ति | भविष्यति |

## उपसर्गयुक्त-धातवः

कुछ धातु ऐसे होते हैं जिनके पहले उपसर्ग लगने से उनके अर्थ में अन्तर आ जाता है (Some verb-roots change in meaning when some prefix is attached to them) —

1. आ + गम् (गच्छ्) = आगम् (आगच्छ्) = आना (to come)
2. अव् + गम् (गच्छ्) = अवगम् (अवगच्छ्) = समझना (to understand)
3. आ + नी (नय्) = आनी (आनय्) = लाना (to bring)

## संख्या

| | | | |
|---|---|---|---|
| एक | = | एक | (one) |
| द्वौ | = | दो | (two) |
| त्रयः | = | तीन | (three) |
| चत्वारः | = | चार | (four) |
| पंच | = | पाँच | (five) |
| षट् | = | छः | (six) |
| सप्त | = | सात | (seven) |
| अष्ट | = | आठ | (eight) |
| नव | = | नौ | (nine) |
| दश | = | दस | (ten) |

# विभक्तिः

कुछ विशेष नियम हैं। नीचे लिखे शब्दों से पहले आने वाले शब्द में विशेष विभक्ति का प्रयोग होता है (Some special rules for vibhaktis) —

| शब्दः | विभक्तिः | उदाहरणम् |
|---|---|---|
| विना | द्वितीया, तृतीया, पंचमी | जनकः *बालम्* (*बालेन*, *बालात्*) विना न गच्छति। |
| 'रक्ष्' धातु | द्वितीया | सैनिकः *देशम्* रक्षति |
| 'गम्' धातु | द्वितीया | सः *ग्रामम्* गच्छति |
| सह | तृतीया | सः *अजेन* सह गच्छति |
| दा (यच्छ्) | चतुर्थी* | अहम् *बालाय* पुस्तकम् यच्छामि |

***जिसको चीज़ दी जाए, उसके वाचक शब्द के साथ चतुर्थी विभक्ति आती है (Fourth vibhakti is attached to the word denoting someone to whom something is given).**

# विशेषणम्

**विशेष्य के लिंग, विभक्ति और वचन के अनुसार विशेषण का लिंग, विभक्ति और वचन होता है (Adjectives get the same gender, vibhakti, number as the nouns they qualify) —**

**उदाहरणम्—**

| | | |
|---|---|---|
| प्रसन्नः बालः | प्रसन्नम् मित्रम् | प्रसन्ना कन्या |
| प्रथमः छात्रः | प्रथमम् फलम् | प्रथमा छात्रा |

# विशेषणों की सूची (List of Adjectives)

| विशेषणम् | पुँल्लिंगम् | नपुँसकलिंगम् | स्त्रीलिंगम् |
|---|---|---|---|
| श्याम | श्यामः | श्यामम् | श्यामा |
| हरित | हरितः | हरितम् | हरिता |

| | | | |
|---|---|---|---|
| श्वेत | श्वेतः | श्वेतम् | श्वेता |
| प्राज्ञ | प्राज्ञः | प्राज्ञम् | प्राज्ञा |
| मूर्ख | मूर्खः | मूर्खम् | मूर्खा |
| स्वस्थ | स्वस्थः | स्वस्थम् | स्वस्था |
| प्रसन्न | प्रसन्नः | प्रसन्नम् | प्रसन्ना |
| मधुर | मधुरः | मधुरम् | मधुरा |
| गर्वित | गर्वितः | गर्वितम् | गर्विता |
| धूर्त | धूर्तः | धूर्तम् | धूर्ता |
| अपवित्र | अपवित्रः | अपवित्रम् | अपवित्रा |
| प्रथम | प्रथमः | प्रथमम् | प्रथमा |
| द्वितीय | द्वितीयः | द्वितीयम् | द्वितीया |
| तृतीय | तृतीयः | तृतीयम् | तृतीया |
| सुन्दर | सुन्दरः | सुन्दरम् | सुन्दरी |

## अव्ययाः

**अव्यय के रूप कभी नहीं बदलते (Forms of *avyayas* never change)—**

| | | | |
|---|---|---|---|
| न | प्रातः | कुतः | आम् |
| अपि | परस्परम् | अधुना | वृथा |
| तु | प्रतिदिनम् | कुत्र | दूरे |
| च | विना | यदा | अग्रे |
| अत्र | सह | तदा | एवम् |
| तत्र | नीचैः | किमर्थम् | श्वः |

# शब्दकोषः

## अ

| | | |
|---|---|---|
| अग्रे | आगे | ahead |
| अग्रजः | बड़ा भाई | elder brother |
| अंगम् | अंग | limb, part of body |
| अंगुष्ठः | अंगूठा | thumb |
| अजः | बकरा | goat *(male)* |
| अत्र | यहाँ | here |
| अधुना | अब | now |
| अध्यापिका | अध्यापिका | lady teacher |
| अपवित्र | अपवित्र | unpious |
| अपि | भी | also, too |
| अव+गम् (गच्छ्) | समझना | to understand |
| अश्वः | घोड़ा | horse |
| अष्ट | आठ | eight |
| अस् | होना | to be |
| असि | *(तुम)* हो | *(you)* are |
| अस्ति | *(वह)* है | *(he)* is |
| अस्मि | *(मैं)* हूँ | *(I)* am |
| अहम् | मैं | I |

## आ

| | | |
|---|---|---|
| आ+गम् (गच्छ्) | आना | to come |
| आ+चर् | करना | to do |
| आ+नी (नय्) | लाना | to bring |
| आपणः | दुकान | shop |

| | | |
|---|---|---|
| आम् | हाँ | yes |
| आरम्भः | आरम्भ | beginning, start |
| आवाम् | हम दो | two of us |
| आश्रमः | आश्रम | hermitage |
| **ई** | | |
| ईश्वरः | ईश्वर | God |
| **उ** | | |
| उद्यानम् | बाग | garden |
| **ए** | | |
| एकः | एक | one |
| एवम् | इस प्रकार | like this |
| एतत् (नपुँ.) | यह | this |
| एषा (स्त्री.) | यह | this |
| एषः (पुँ.) | यह | this |
| **औ** | | |
| औषधम् | दवाई | medicine |
| **क** | | |
| कः | कौनसा, कौन | which, who |
| कन्या | लड़की | girl |
| कमलम् | कमल का फूल | lotus flower |
| कर्णः | कान | ear |
| कलमः | कलम | pen |
| कलाकारः | कलाकार | artist |
| काकः | कौआ | crow |
| कालः | समय | time, tense |

| | | |
|---|---|---|
| किम् | क्या | what, *question-maker* |
| किमर्थम् | किस लिए | what for, why |
| कुक्कुरः | कुत्ता | dog |
| कुतः | कहाँ से | from where |
| कुत्र | कहाँ | where |
| कूज् | कूकना | to chirp |
| कूपः | कूआँ | water-well |
| कृषकः | किसान | farmer |
| क्रन्द् | रोना | to cry |
| क्षेत्रम् | खेत | field |

## ख

| | | |
|---|---|---|
| खगः | पक्षी | bird |
| खट्वा | खाट | cot, bed |
| खड्गः | तलवार | sword |
| खाद् | खाना | to eat |
| खेल् | खेलना | to play |

## ग

| | | |
|---|---|---|
| गजः | हाथी | elephant |
| गन्धः | बू | smell |
| गम् (गच्छ्) | जाना | to go |
| गर्ज् | गरजना | to roar |
| गर्वित | घमण्डी | proud |
| गायकः | गायक | singer |
| गायिका | गायिका | female singer |
| गीता | गीता | the Gita |
| गुरुदेवः | पूज्य गुरु | respected teacher |

| | | |
|---|---|---|
| गुहा | गुफ़ा | cave |
| गृहम् | घर | house |
| गै (गाय्) | गाना | to sing |
| ग्रहः | ग्रह | planet |
| ग्रामः | गाँव | village |
| ग्रीवा | गर्दन | neck |
| **घ** | | |
| घासः | घास | grass |
| **च** | | |
| च | और | and |
| चक्रम् | पहिया | wheel |
| चणकः | चना | gram, black chicpea |
| चत्वारः | चार | four |
| चन्द्रः | चाँद | moon |
| चर् | चरना | to graze |
| चल् | चलना | to walk, to move |
| चित्रकारः | चित्रकार | painter |
| **छ** | | |
| छात्रः | छात्र | student |
| छात्रा | छात्रा | (*girl*) student |
| छात्रावासः | छात्रावास | hostel |
| **ज** | | |
| जनकः | पिता | father |
| जलम् | पानी | water |
| जीव् | जीना | to be alive |
| ज्ञानम् | ज्ञान | knowledge |

## त

| | | |
|---|---|---|
| तत् *(नपुँ.)* | वह | that |
| ततः | वहाँ से | from there |
| तत्र | वहाँ | there |
| तदा | तब | then |
| तव | तेरा | your |
| तस्य *(पुँ.)* | उसका | his |
| तस्याः *(स्त्री.)* | उसका | her |
| ताः *(स्त्री.)* | वे सब | they all |
| तानि *(नपुँ.)* | वे सब | they all |
| तापसः | तपस्वी | ascetic |
| तु | तो | but, on the other hand |
| तृतीय | तीसरा | third |
| तृ (तर्) | तैरना | to swim |
| ते *(नपुँ., स्त्री.)* | वे दो | they two |
| तौ *(पुँ.)* | वे दो | they two |
| त्यज् | छोड़ना | to leave |
| त्रयः | तीन | three |
| त्वम् *(एकवचन)* | तुम | you |

## द

| | | |
|---|---|---|
| दश | दस | ten |
| दा (यच्छ्) | देना | to give |
| दिनम् | दिन | day |
| दुग्धम् | दूध | milk |
| दूरे | दूरी पर | at a distance |

| | | |
|---|---|---|
| दृश् (पश्य्) | देखना | to see |
| देशः | देश | country |
| द्वितीय | दूसरा | second |
| द्वौ | दो | two |
| **ध** | | |
| धनिकः | धनी | rich |
| धाव् | दौड़ना | to run |
| धूर्तः | ठग | cheat |
| **न** | | |
| न | नहीं | not |
| नगरम् | नगर | city |
| नम् | नमस्कार करना | to salute, to bow |
| नरः | आदमी | man |
| नव | नौ | nine |
| नाम | नाम | name |
| नायकः | नायक | leader (*male* ) |
| नायिका | नायिका | leader (*female*) |
| नी (नय्) | ले जाना | to carry |
| नीचैः | नीचे | below |
| नृपः | राजा | king |
| नेत्रम् | आँख | eye |
| **प** | | |
| पच् | पकाना | to cook |
| पञ्च | पाँच | five |
| पठ् | पढ़ना | to read |
| पत् | गिरना | to fall |

| | | |
|---|---|---|
| पत्रम् | पत्ता, चिट्ठी | leaf, letter |
| पथिकः | यात्री | traveller |
| परस्परम् | आपस में | with one another |
| पा (पिब्) | पीना | to drink |
| पाठशाला | स्कूल | school |
| पाण्डवः | पाण्डव | Pandava |
| पादः | पैर | foot |
| पादत्राणम् | जूता | shoe |
| पिकः | कोयल | cuckoo |
| पुष्पम् | फूल | flower |
| पुस्तकम् | किताब | book |
| प्रकाशः | रोशनी | light |
| प्रतिदिनम् | हर रोज़ | daily |
| प्रथम | पहला | first |
| प्रसन्न | खुश | happy |
| प्राज्ञ | बुद्धिमान | wise, intelligent |
| प्रातः | सुबह | morning |
| **फ** | | |
| फलम् | फल | fruit |
| **ब** | | |
| बालः (बालकः) | लड़का | boy |
| बाला (बालिका) | लड़की | girl |
| बीजम् | बीज | seed |
| ब्राह्मणः | ब्राह्मण | Brahmin |
| **भ** | | |
| भक्तः | भक्त | devotee |
| भवनम् | मकान | house |

| | | |
|---|---|---|
| भू (भव्) | होना | to be |
| भूषणम् | ज़वर | ornament |
| भोजनम् | भोजन | food |
| भ्रम् | घूमना | to roam about |
| भ्रमरः | भौंरा | black-bee |
| **म** | | |
| मत्स्यः | मछली | fish |
| मधुर | मीठा | sweet |
| मम | मेरा | my |
| मयूरः | मोर | peacock |
| मार्गः | रास्ता | path |
| मालाकारः | माली | gardener |
| मित्रम् | मुँह | mouth |
| मूर्ख | मूर्ख | foolish |
| **य** | | |
| यदा | जब | when |
| युवाम् | तुम दो | you two |
| यूयम् | तुम सब | you all |
| **र** | | |
| रमा | लक्ष्मी | goddess of wealth |
| रूप्यकम् | रुपया | rupee |
| **ल** | | |
| ललना | औरत | woman |
| लिख् | लिखना | to write |

| | | |
|---|---|---|
| लूता | मकड़ी | spider |
| लेखः | लेख | article |
| लेखकः | लेखक | writer |

**व**

| | | |
|---|---|---|
| वद् | बोलना | to speak |
| वनम् | वन | jungle |
| वर्णः | रंग | colour |
| वस् | रहना | to live |
| वसुधा | पृथ्वी | earth |
| वस्त्रम् | कपड़ा | cloth, garment |
| वाटिका | बग़ीचा | garden |
| वानरः | बन्दर | monkey |
| वार्तालापः | बातचीत | conversation |
| विडालः | बिलाव | cat (*male*) |
| विद्यालयः | स्कूल | school |
| विना | बिना | without |
| वृक्षः | पेड़ | tree |
| वृथा | बेकार में | in vain |
| वेदः | वेद | the veda |
| वैद्य | डॉक्टर | doctor |

**श**

| | | |
|---|---|---|
| शकटः | गाड़ी | cart |
| शस्त्रम् | शस्त्र | weapon |
| शारदा | सरस्वती | Goddess of Learning |
| शिक्षकः | अध्यापक | teacher |
| शिष्यः | शिष्य | pupil |

| | | |
|---|---|---|
| श्याम | काला | black-bee |
| **स** | | |
| सन्ति | (वे) हैं | *(they)* are |
| सप्त | सात | seven |
| सप्ताहः | हफ़्ता | week |
| सरोवरः | तालाब | pool |
| सह | साथ | with |
| सा (*स्त्री.*) | वह | she |
| सिंहः | शेर | lion |
| सुन्दर | सुन्दर | beautiful |
| सूर्यः | सूरज | sun |
| सेवकः | नौकर | servant (male) |
| सैनिकः | सैनिक | soldier |
| स्तः | (वे दो) हैं | (*they two*) are |
| स्थ | (*तुम सब*) हो | (*you all*) are |
| स्था (तिष्ठ्) | ठहरना | to stay |
| स्थः | (*तुम* दो) हो | (*you two*) are |
| स्वः | (*हम* दो) हैं | (*we two*) are |
| स्वस्थ | स्वस्थ | healthy |
| **ह** | | |
| हंसः | हंस | swan |
| हरित | हरा | green |
| हस् | हँसना | to laugh |
| हस्तः | हाथ | hand |

□□□




पीताम्बर